Shri Raghunath Temple MSS. Library,
JAMMU

No. १२६७

Title शास्त्रदीपिका प्रकाशः
१ माधवार्यः

Author श्री चम्पकनाथः

Extent ३५ Age ०

Subject पू० मीमांसाशास्त्रं

मन्त्रदीपिकाप्रकाशनवमाध्यायः

४२६७

श्लो

११००

पत्रे ३५

शास्त्रदीपिकाप्रकाशटीकानवमाध्याय [redacted]

ग्रा०टी०८
१

श्रीमते रामानुजाय नमः ॥ अथ नवमस्याध्यायस्यारम्भः ॥ यज्ञ हेतुहेतुमद्भावसंगतिमाह
सिद्धइत्यादिना ऊह स्वरूपमाह द्वारेति अस्ति स्वग्नये जुष्टमिति मंत्रेणाग्निपहृत्य सौर्ये सूर्यदेवताप्र
काशनरूपद्वारस्य आहुताग्निप्रकाशनरूपद्वारादन्यस्य संबंधेन सूर्यायेत्येवं ऊहोन्यथाभावः
साम्नोभिव्यंग्यान्तररूपद्वारान्तरसंबंधादन्यथाभावः अवघातादिसंस्कारेनीवारादिकर्मकारको
तररूपद्वारान्तरसंबंधात्क्रियायाश्चकर्मावसाधितयातन्निरूपितत्वमेवान्यथाभाव इति बोध्यं
कार्यमुखेनेह दृष्टादृष्टोपकारमुखेन पूर्वोक्तरीतिय जेर्दर्शपूर्णमासादिना विशेषणयोगात्सर्वस्य
ज्यर्थनया सर्वत्रोपदेशेनैव प्राप्तिरिति पूर्वः पक्षः करणेतिकर्तव्यताविशिष्टापूर्वभावनाविधानेप
हणान्यायेन करणानुग्राहकत्वसिद्धेरुद्दिष्टविधानानपेक्षणा इतिकर्तव्यताविशिष्टायज्ञभावना
विहितानङ्गभावनाकरणएवेतदितिकर्तव्यतानिर्देशार्थं अंतरेण निर्देश इति सिद्धांतश्चेत्यर्थः मत्रेयत्तक
र्मयुजिकार्यमपूर्वमित्यर्थः तत्प्रधानं सर्वेधर्मास्तदर्थाइत्यर्थः हियस्मात्तदेवबोध्यते तस्यापूर्वस्यद्रव्ये श्री राम:
षु संस्कारोवघातादिस्तत्प्रयुक्तोऽपूर्वप्रयुक्तः अपूर्वार्थत्वात् द्रव्यसंस्कारग्रहणं सर्वधर्मोपलक्ष १

णार्थभाव्योक्तं वर्णकांतरं विवक्षन्नाह तत्रेति समस्य पूर्वप्रयुक्तत्वे वघातादेर्मंत्राणां च नप्रया
जाहिवरदृष्टद्वारांतानिर्देधर्मेत्राधिकरणाहो निरस्तत्वात् किंतु व्रीह्यग्न्यादिद्वारा तत्र किं व्रीह्यग्न्या
दिस्वरूपं विवक्षितं उतापूर्वसाधनविशेषमात्रमेव विवक्षितमिति चिंत्यत इत्यर्थः अवघाता
दीनामसांकर्यार्थं विशेषेत्युक्तं तंडुलनिष्पत्तिद्वारापूर्वसाधनेत्यर्थः व्रीह्यादिस्वरूपविवक्षा
विचारस्य फलमाह स्वरूपेति नन्वेवमपि व्रह्मत्वाद्दर्शपौर्णमासिकापूर्वसाधनविशेषस्येव
द्वारत्वं स्यात्तथा च कथमूह इति शंकते नन्विति आभाकरीत्या समाधानं शंकते यस्येति अपू
र्वस्येति ॥ ग्राहकापरनामकः फलापूर्वस्येत्यर्थः तथा च ग्राहकीयत्वेनैव व्रीह्यादिसाधनस्य द्वार
त्वं न तु नांतरीयकदार्शपौर्णमासिकत्वेन तत्र श्वैवेहतस्यापि तद्दशालाहइः सिध्यतीति भावः ।
ग्राहकीयत्वं न साक्षात्किंतु करणीभूतायुग्रयादिनिष्ठेति द्वारात्वतो न संबद्धकरस्पिशंकते अथे
ति साधनप्रयुक्तौ इति अवघातस्य व्रीहिस्वरूपे आनर्थक्याद्दर्शपूर्वसाधनव्रीह्यर्थत्वे वक्तव्ये सती
त्यर्थः तथा च व्रीहिपदेनापूर्वसाधनस्य लक्षणयानुवादादनुवादस्य समभिसंभवे सन्निहितन

शा०टी०२
२
गामित्वात्यक्तत्वानामेवापूर्वसाधनरूपेणोद्देशाद्व्रीहिभिर्यजेतेति श्रुत्यावगतंयद्धविः प्रकृतत्वेना
पूर्वसाधनंतत्त्रैवावघातपर्यवसानात्तुक्लोऽवहतेरपूर्वंकुर्यादिति शास्त्रार्थः पर्यवस्यतीतिनसां
कर्यविकृतावपिततत्कुर्यादित्यतिदेशस्यतत्रैवपर्यवसानाद्दृहसिद्धिश्चेतिभावः श्रुतिसंयुक्तेष्व
केन्यायवाक्यलिंगसंयुक्तेष्वप्यतिदिशतिएवमितिचिंताफलमुपपादयन्पूर्वपक्षंसंग्रहातितत्रेति·
म एवंचसप्तमाद्यंवघातादीनामपूर्वार्थत्वमात्रपरंतावतैवव्यवस्थासिद्धेर्ननुव्रीह्यादिस्वरूपाविवक्ष
यासाधनार्थपरमपीतिनपुनरुक्तिः सत्रेनत्वंरव्यंयुक्तंपूर्वसाधनत्वप्रसक्तः तदर्थत्वात्प्रो
क्षणपूर्ववत्।एवंद्विविधोक्तरूपमथवेत्यादिभाष्यंसाधनविशेषार्थत्वविचारपरतयाव्याख्यायप्र
कारांतरेणाव्याचष्टेनथेतिसप्तमाद्येव्यवस्थामात्रंव्युत्पाद्यंसाचापूर्वार्थत्वाभावेपिमिन्नेऽक्रहोमी
त्यादौभेदेसतिहोतव्यमितिवदपूर्वेवमतिधर्माः कर्तव्याइतिनिमित्तत्वमात्रेणापिसिध्यतीत्यपू श्रीराम:
र्वार्थत्वंतत्रनव्युत्पाद्यंकिंत्विहैवोहमिध्यपूर्वव्युत्पादनइत्यर्थः ननुयज्यर्थत्वेपिनीवारादित्वदृ २
ष्टद्वारांतरसत्वादूहः किंनस्यात्तत्राहयजीतियजिस्वरूपप्रयुक्तत्वेनीवारादिसंबंधएवउल्ले

मइति भावः इत्याशंक्येति इत्यधिकामाशंकां हन्तुमित्यर्थः । अतिपातयत इति श्रुत्याद्यवगतश्रौत्याद्यर्थ-
त्वनिर्वाहायैवेति भावः । भाष्येणेति भाष्यान्तरेणेत्यर्थः । ननु यद्दृष्टाद्यभावान्निमित्तस्यैवेष्टतीतेस्त-
द्विशेषविचारेण न युक्त इत्यत आह नचेति । कादाचित्कत्वनिष्प्रयोजकमेव निमित्तमिति भावः ।
साध्यत्वात्साध्यत्वेन श्रूयमानत्वादित्यर्थः । यजिरिति करणतया सिद्धवत्प्रतीयमानत्वाद्देहवा-
देस्तथाविधस्यैव निमित्तत्वावगमादिति भावः । यजिनिमित्तत्वफलमाह नतुल्येति केनचिदि-
ति पञ्चहादिनेत्यर्थः । अर्थादिति धर्मप्रवृत्तेः कादाचित्कत्वादित्यर्थः । आर्थिकमपि तद्यजेरस्त्व-
तत्राह साध्यं हीति क्रियोचित्यादिति भावः । उक्तस्य फलमाह विकृतीति सत्त्वेन तत्त्वयुक्तस्तन्निमित्तः ॥
संस्का ॥ पुनरुक्तिं परिहरति पूर्वेति तत इति तन्त्रेत्यर्थः । यद्यपि तत्र धर्माणाम पूर्वार्थत्वमुक्तं तथापि
संक्षेपेण प्रतिज्ञामात्रेण सिद्धमिह त्वाशंकानिराकरणेन दृढीक्रियत इत्यर्थः । विशेषणेति उत्क-
र्षवलादेर्विशेष्यस्य वाक्यान्तरादर्थाद्वा प्राप्तत्वाद्विशेषणस्य शेषत्वेनस्याप्राप्तत्वात्तत्परेणेत्यर्थः ।
अन्यसाधनभूतयोरन्यसाधनत्वेन बोधितयोः गम्यमानमिति विशेषणत्वबलादिति भावः ।

शा॰दी॰२
३

तदर्थमिति॰ उलूखलादिद्वारेतिभावः॥ अत्र किं प्रोक्षणं हंतिपिष्ट्यर्थमुतापूर्वार्थं तदर्थं च किं तयोर्हं
तिपिष्टिसाधनत्वप्रयुक्तं प्रोक्षणमुतापूर्वसाधनत्वप्रयुक्तमिति चिंताद्वयमभिप्रेत्याह इहेति॰ पू
र्वाधिकरणोक्तापूर्वार्थत्वाक्षेपणं संगतिः॥ तत्साधनत्वमिति उलूखलमुसलयोरिति शेषः। सामा
नाधिकरण्यादिति प्रोक्षितशब्दस्य हंत्यादिसाधनबोधकोलूखलादिपदसामानाधिकरण्यादुलूख
लादिसंस्कारकत्वेन विधीयमाने प्रोक्षणे गम्यमानहंत्याद्यर्थभवतीत्यर्थः॥ तद्विशेषणं हंत्यादिगुणभू
तं हंत्याद्यर्थमिति यावत् तं शंकते हंतीति नहीति गोदोहनादेरपि फलार्थत्वप्रसंगादिति भावः॥ न वहं
तिपदेनेति। सिद्धांते वक्ष्यमाणरीत्या वाक्यभेदप्रसंगात्सकृच्छ्रुतस्योभयार्थत्वायोगाच्चेति भावः॥ बाधि
तेति तस्य वाक्याद्बलवत्वादिति भावः॥ नन्वेवमपूर्वार्थत्वं स्यात्तत्राह यद्येति॰ उपकारकत्वं शे
षत्वं न भवतीति द्वितीये सिद्धमित्यर्थः॥ उपकारकत्वमात्रेणेह सिद्धिः किं न स्यात्तत्राह यच्चेति॰ अं　श्रीरामः
गस्येवातिदेशो नोपकारकमात्रस्येति भेगुणकाभिषित्यधिकरणे सिद्धमित्यर्थः। एवं प्रोक्षणस्या　३
वघाता र्थत्वे किं फलमाह नखेति कृष्णानां व्रीहीणां नखनिर्भिन्नमिति विहिते राजसूयांतर्गते इति शेषः॥

त्यश

अभ्युपेत्याप्याह तथापीति तद्द्वारेणेति वक्ष्यमाणरीत्या ऽपूर्वजनकव्यापारविशेषरूपद्वारेणेत्य
र्थः। तेन प्रोक्षणेन तस्यापूर्वस्य तद्रूपत्वेति तस्या लौकिकत्वादिति भावः। तत्त्वरूपेतिउक्तरूपेत्य
र्थः। नन्वहंतिशब्दस्यापूर्वजननव्यापारविशेषपरत्वेपि प्रोक्षणस्य साक्षाद्दुत्पत्त्यर्थत्वेनाविधानादुल
खलमुसलसंस्कारकस्य तस्य कथमपूर्वार्थत्वमत आह एवमिति प्रोक्षणविनेत्यन्वयः। सूत्रे संस्का
रहंत्यादोषुज्यमानानां साधनत्वेन संबध्यमानानां प्रोक्षणादीनां अहंत्यादित्रयुक्तता स्यात्तदर्थ
त्वात्। वएतांतरमाह यावतेति पूर्वेत्र हंत्याद्यर्थत्वे आनर्थक्यात्प्रोक्षणस्यापूर्वार्थत्ववदिहा
पि निष्फलत्व। दीक्षणीयापूर्वार्थत्वे आनर्थक्यात्फलंज्योतिष्टोमापूर्वार्थत्वमिति स्वस्थानात्प्रसं
तिः स्वरस्यानर्थसंकिंतेनापि निष्फलदीक्षणीयापूर्वार्थत्वे आनर्थक्यात्फलंज्योतिष्टोमापूर्वा
र्थत्वमिति स्वस्थानात्संगतिः स्वरस्यानर्थकं किंतेन विनापि दीक्षणीयापूर्वसिद्ध्यवगमाद्धुतनिष्फ
लत्वान्न्यायेइत्याह तस्यापीति नद्वितीयत्रिस्याद्दफलापूर्वेनिउत्कालहितलक्षणमुपपादयति
दीक्षणीयाहीति अत्र पूर्वपक्षे त्रेधातनवीयायाआग्नावैष्णवापूर्वसाधनत्वाभावात्तत्प्रयुक्तोयंन
त्रेधातनवीदीक्षणीयेत्यश्वमेधे आग्नावैष्णवलक्षणप्रकृतदीक्षणीयास्थानापन्नायामयंवाद्धिः यमः प्रवर्तते सिद्धांततु १

शा॰टी॰८ ४ ५

प्रवर्तन इति। भाष्योक्तप्रयोजनस्य वार्तिके दूषितत्वादुदाहरणान्तराभिप्रायेणाह एवंजातीयका
इति। एतेनेति। प्रत्यासन्नत्वेनेत्यर्थः। प्रयाजेति प्रयाजादेरुत्पन्नं गानं चेत्यर्थः। ननु व्रीह्यादिसमवेत
स्य संस्कारस्य कथमदृष्टत्वं कथं वा न दृष्टाभावे प्रयोजकत्वं नत्राह संस्कारोपीति। अलौकिकत्वाददृष्ट
वल्लौकिकैर्गौणी। अलौकिकत्वादेव प्रयोजकत्वं चेत्यर्थः। सर्वे संस्कारशब्देन दीक्षारूपो यजमानसं
स्कारो विवक्षितः। नकुत्रेन च परमापूर्वे॥ फला। पूर्वत्र यथा परमापूर्वार्थे दीक्षणीयापूर्वार्थत्वं वाद्रि
यमस्य न परमापूर्वार्थत्वं एवं मंत्रस्याप्यग्न्याद्यर्थत्वं न तद्वारा दर्शपूर्णमासापूर्वार्थत्वमिति संगतिः।
फलस्येति। अदृष्टरूपत्वात्त्वानर्थ्यमपूर्वापेक्षयाध्यान्यानुद्देनाह देशेण स्वयमेव मंत्रान्वयसंभ
वस्येत्यर्थः। यद्यप्यग्नेरुज्जितिमनूर्ध्वं लोकं जयमहमनूज्जेषमनुस्रत्योर्ध्वं जयेयमिति स्वर्जयेय एव प्रा
र्थ्यते नाग्निः। तथापि स्वर्जयोप्यग्नियागेन प्रार्थ्यत इत्यग्नेर्याच्यमानत्वं नास्तीति। अन्यथा मंत्रस्य सा श्रीराम: ४
क्षात्फलार्थत्वेन स्वप्रकाशनमात्रेण फलसिध्येन्न च सिध्यत्यत आनर्थक्यमित्यर्थः। ननु क्रतुशेष
त्वेपि तद्वारा तत्फलप्रयुक्तत्वमेवास्तु। किं मन्तर्गडुनात आह नहीति। अत्रताग्न्यादेरपूर्वापदेवतात्वादिरूपेण

धर्मप्रयोजकत्वेप्यग्निस्त्वादिरूपेणैव मंत्रप्रकाश्यत्वमन्यथा मंत्राणां मुख्य एवार्थे विनियोग इति
नातीय न्यायविशेषान्नया चानेन मंत्रेण फलदेवताप्रकाशनद्वारा चरुपूर्वं कुर्यादिति मंत्रविनियोगः पू
र्ववस्य तौ त्वाशयेनाह तस्मादिति एवं च ग्रंथेषु कल्लक्षणोक्तिः पूर्वपक्षे एवं सान्नाभिप्रायेणेति बोध्यं विचा दि२
रफलमाह तनश्चेति सत्त्वे फलदेवतयोरप्रयोजकत्वं ॥ दे॥ फलदायित्वेपि देवतायाः स्वरूपेणाप्रयो
जकत्वं नेत्युक्तमित्यन्वयः प्राधान्यमिति प्राधान्येपि हि प्रयोजकता स्यादिति भावः प्रतिपाद्यतद
ति पूर्वोक्तापूर्वप्रयोजकत्वमाक्षिप्य समर्थ्यं तदित्यर्थः अत एवांतरसंगतिः प्रकारांतरमाह स वा
र्वेति एवं च सर्वोपयुक्तत्वादस्य विचारस्याद्यो वेदयुक्तत्वेप्यवांतरसंगतिवशादत्रोक्तन इति भावः
किमितिकिं यागो देवताराधनार्थः उत फलार्थः फलार्थत्वेपि देवताप्रसादो द्वारमुताऽपूर्वमि
ति विंत्यम इत्यर्थः संप्रदानत्वात्त्यज्यमानहविरुद्देश्यत्वात् कर्मणः कर्मकारकात् यागश्चेति य
ज देवपूजासंगतिकरणदानेष्विति स्मरणात्तत्रापि प्रसिद्धिप्राचुर्यात् पूजार्थत्वं यजेरित्यर्थः अत
इति आराधनाशब्दोत्र प्रसादपरः तेनाराधनायाः पूजात्मकयागाभेदेपि विरोधः आर्थवादिक
ने

शा॰ दी॰ ९
५

कत्वेनेदृष्टांतो राजेति देवतेति तत्रश्च देवताया यागे साधनत्वेनैवान्वयाद् गुणत्वमेव प्राधान्यं तु का
रकभावाद्यन्नावार्थिकं न चोदनेन गम्यं पदश्रुतिगम्यया गत्वा न फलभाव्यनाकरणत्वाविरोधादिति भा
वः यागस्य प्रज्ञातत्वात् इज्यमानदेवताराधनार्थत्वमुक्तं निरस्यति न चेति तत्रश्च तद्यर्थत्वे श्चानर्थ
क्यमिति भावः शाब्दस्य तिस्रोदेशपदत्वमात्रनिबंधनेति इष्टव्यं श्रूयमाणत्वादिति अश्वमेधइति
शेषः अन्यत इति स्वपक्षे चदध्यादिद्रव्यभेदेन फलभेदस्य चोदनाप्रमाणकत्वान्न स्वभाव
मूलकत्वमिति भावः प्रयोजनं देवतायाः प्राधान्ये तत्सामान्यमेव बलवदिति स्यैन्द्रपुरोडाशे सा
न्नाय्यविध्यंतः सिद्धांते हविःसामान्यादाग्नेयविध्यंतः स्यादिति। सूत्रे देवतेनैव सर्वार्थमोऽन्यपयोजयेत
भोजनस्य यागस्य इदं हविर्देवता भोक्ष्यत इति क्रियमाणत्वाद्यागस्य भोजनशब्देन निर्देशः दे
वतार्थत्वात् भोजनस्य भोक्त्रर्थत्वे दृष्टांतो निषिध्यते इति॥ द्रव्य॥ पदश्रुतिबलाद्यागस्य साधनत्व श्रीरामः
व द्वितीयाश्रुतिबलाद्व्रीहिस्वरूपार्थत्वमिति संगतिः ननु प्रकरणापेक्षया वाक्यलिंगयोरपि बलव ५
त्वमस्त्येवातोऽस्त्वंतविशेषणत्वं तत्श्रुतेर्नैविशेषइत्यरुच्याह अश्रूयैवाते अस्मिन्पक्षेतदप्यत्रोदाहरणं

5

बोध्यं अप्रवर्गोर्थत्वसिद्धान्ते पिश्री त्याद्यर्थत्वानपायात्तं शायं निष्कृष्याह यदिति तन्मात्रेति बलत्पूर्व
पर्यवसितमित्यर्थः तन्मात्रं चेति श्रीहि स्वरूपमात्रेण न तु प्रोक्षणमित्यर्थः साधनतान्वयपक्षे तु प्रो
क्षणमपि कृत्वं गमित्याशयेनाह प्रोक्षितैरिति चिंताफलमाह स्वरूपेति स्वरूपमात्रपर्यवसितं तु
प्रोक्षणस्य क्रतुभावनेत्थंभावसंबंधाभावेन तद्विशेषणत्वाभावादिति देशो न स्यादित्यर्थः सिद्धं
भवतीति नीवारादिभिः प्रत्याम्नाने व्रीहिनिवृत्तावपि प्रोक्षणस्य व्रीह्यर्थत्वाभावेन तन्निवृत्त्या
निवृत्त्यर्थभावादिति भावः सोत्रं द्रव्यप्रयोजकत्वमुदाहृत्य संख्यादिप्रयोजकत्वमुपपादयति
नयेति त्रीनिति त्रीन् परिधीन् स्विष्टः समिध इत्यादिर्मंत्रः अपूर्वेतितया च परिधिद्वयप्रयुक्तमपि
२४ तत्प्रयुक्तत्वस्य उक्तत्वात् इति भावः समुदायप्रयुक्तत्वे पार्वणहोमवदनतिदेशः इतरथा तिदेशाः इतिद्वयं
न निवृत्तिमित्युक्तमपि स्वगुणत्वमेवावगम्यत इति भावः हेतुश्रुत्येति हि शब्दबलाद्यघदत्तकरणं
तद्धोमेन संबंधयितव्यमिति व्याप्तिवचनं कल्प्यमिति भावः सिद्धान्तयति श्रीधादाविति हवीरूप
स्येति हविः अकृतिवत्स्येत्यर्थः तेनयवादि साधारण्यसिद्धिः नापि स्तुवादावतिप्रसंगः नवावि

शा.दी.९ क्लिष्टोद्देशादोषः एकेनैव व्रीहिशब्देन लक्षणया विशिष्टस्यावगमात् उद्देश्योपस्थापकत्वे हि वि-
६ क्लिष्टोद्देशदोषः व्रीह्यादिधीनिरपेक्षत्वं पूर्वसाधनपरिधीयज्ञोपकारकापत्तेरिति विशिष्टोद्देशेपि
समदोषः विधेयमंत्रगतपरिधीयज्ञोपकारकज्ञानसामर्थ्यानुसारेणोद्देश्यविशेषणाविवक्षा-
यान्याय्यत्वादिति भावः ननु भवतु प्रोक्षणादौ नाम पूर्वसाधनान्वयः व्रीहिपदेन शास्त्रान्तरावग-
गतापूर्वसाधनविशेषस्य लक्षयितुं शक्यत्वात् यत्र तु द्रव्यं संस्कारश्चैकेन वाक्येन विधीयते तत्र
द्रव्यस्य शास्त्रान्तरेणापूर्वसाधनत्वानवगमेन संस्कारस्य तादर्थ्यं न स्यादिति शङ्कते यदि तु न
श्चितमिति उत्तरमाह सुतरामिति न हीति किंतु कारकत्वेन क्रियायामेवेत्यर्थः व्रीहिमिश्रत्वं लक्षणान्यायेन पा-
र्ष्णिकः संबंध इत्याह साधनत्वेनेति तावता संस्कारस्य साधनसंबंधः कुत इत्याशंक्य पर्यवसितमा-
ह अयं हीति प्रोक्षितत्वविशेषेणैव साधनत्वान्वयात् प्रोक्षितस्यापि साधनरूपान्वय इति भावः य-
वेति यवग्रहणादिकृत्स्नमिश्रायं दर्शितवाक्ये विशिष्टविधिलाघवप्रयत्नेनोपात्तशिष्टव्रीहियवरू- श्रीरामः
ढकल्पादित्वादिति निधिनयानीवारप्रसक्तावपि यवाप्रसक्तेः भावीति सावेश्चादेवीति वाक्य इति भावः ६

नन्विति कृतमात्रांशं परिहरति न पदेति तदुक्तं हेतेनेति नयतेर्द्विकर्मकत्वेऽप्यानीयमानद्रव्याव्या
प्यमानत्वाद्द्वितीयस्य कर्मणः प्रथमस्य च प्राधान्यादिति भावः तदर्थमिति साधनरूपार्थमित्यर्थः
श्रुत्यैव तदुक्तं श्रुत्यैव लाक्षणिकत्वमिति न नुपपयः श्रावृत्त्याप्येवं साधनलक्षणां विनापि पूर्वोपर्या
लोचनयाप्यपसोऽपूर्वार्थत्वेऽवघातस्यापि तथैव तत्संभवात्किं व्रीहिपदलक्षणयेति चेत्तत्र अवघा
तस्य सन्निपातितया न प्रकरणेन साक्षाद्ग्रहणं किंतु व्रीहिद्वारा तेषां च द्वारत्वेन लौकिकत्वेऽतुल
विशिष्टरूपेण नियमांशे तदेव्यर्थापत्तेः किं त्वपूर्वे साधने रूपेणा तच्च लक्षणयैव लभ्यं द्रव्यानयन
स्य तु साधवत्त्वं देवीति संस्कारविशिष्टपरामर्शकतदुक्तं हेतुनापूर्वार्थत्वावगमबलादार्थिकद्वारत्वा
भेऽपि नानुपपत्तिरिति वैषम्यमित्याहुः तेष्वेणा वाचनिकं ग्रंथोक्तविशेषः शेषाद्वमिति न पयः
शरणमत्यमित्यर्थः व्रीहीन्प्रोक्षतीत्यादौ इत्यस्य भूतोपयोगित्वं प्रोक्षितैर्व्रीहिभिर्यजेतेत्यत्र भव
द्वप्योगित्वं न तैः प्रयसीत्यत्र भाव्युपयोगित्वमिति विवेकः भूतत्वादिकं चात्र वाक्यान्तरावगतत्वा
दिरूपं बोध्यं हेतुनिर्देशबलाद्व्यार्थत्वं होमस्योक्तं निरस्यति अन्यत्विति उक्तमिति हेत्वधिकरणे

भा.दी.६ इतिशेषः॥ इहद्रव्यस्यान्नस्योपानिर्देशबलाद्धोमस्यापूर्वार्थत्वे स्थितेनेनतत्र मर्यग्राह्यस्यावयित्वान्नवा
७ दत्वं स्वीकृत्यान्नकरणमात्रं होमसाधनत्वेन। नविधीयते किंत्वन्नकरणत्वे श्रूयंविषेरेवस्त्र
7 तिशिष्युक्तमिन्युपुनरुक्तिः संख्यासमुदाययोरपि द्रव्यान्यायेनाप्रयोजकत्वे दृष्टंवा सूत्रे द्रव्या
त्प्रयोजकं द्वितीयाश्रुतेर्हि शब्दश्रुतेश्च संयोगात्तु वाशब्दो वाक्यलिंगसंयुक्तापेक्षयाश्रुतेर्विशे
षद्योतनार्थः॥६॥ सन्निपातिनाम पूर्वप्रयुक्तत्वे व्यवस्थापितेनन्तरसंगात्सन्निपातिविशे
षेवान्तरापूर्वेलक्षणापूर्वविशेषप्रयुक्तत्वव्यवस्थापनात्संगतिः स्पराद्धहृष्टसंगतिः विशी
करणहेतुरितियावत्तू एषउपांशुस्वरः ततश्चेतिप्राग्भागधर्मत्वेराजसूयादौतद्रागारंभका
येष्वप्राकृताः पदार्थाः पुरस्तादुपसदां सौम्येनप्रचरंतीत्यादयस्तेषप्राहितव्यमित्यर्थः अप्रा
व कृत इतिप्राकृतानामन्तरपदार्थस्थानापन्नेशहितइत्यर्थः यूपेतियूपावटस्तरणबर्हिषोहविरा एषः
सादनार्थं दार्शपौर्णमासिकबर्हिस्थानापत्त्यभावाद्यथाबर्हिर्धर्मालवनादयोनभवंत्येवमि
त्यर्थः सत्रभाष्यंचानुसृत्यसिद्धान्तेनोपक्रमतेनत्रवा मितिवाक्यमनवदितियथाप्रणीताःप्र

णोप्यन्वाचयच्छ्रितोऽतिवाग्यमः प्रणीताः प्रणयनानन्तरभाविप्रोक्षणाद्यर्थः सन्नत्र पूर्वं प्रयुक्तो न तु
दर्शपूर्णमासापूर्वप्रयुक्तः लक्षितेत्यवान्तरापूर्वैः परमापूर्वलक्षणायां लक्षितलक्षणा प्रसंगादेव
मिहापीत्यर्थः व्यवहितोऽपीति व्यवधानं नाङ्गान्तरत्वं प्रयुक्तोऽपि त्रिविक्रमेति पृथक्प्रयोजकत्वे विशे
षः ननु प्राचीनशब्दः प्राग्भागवर्तिपदार्थस्य वाचको न प्राग्भागमात्रस्येति कथं प्राग्भागधर्मते
त्यत आह प्राचीनप्रवृत्तोऽपीति प्रथममिति नागृहीतविशेषणान्यायादिति भावः यत्र संयोगा
भावस्तत्र वक्ष्यमाणरीत्या प्रणीतादीति प्रणीताः प्रणीयन्त्विति विहितोऽवाग्यमो यथावान्तरापू
र्वप्रयुक्तः एवमुपांशुत्वमपि स्यादिति चेदित्येवमित्याद्यसूत्रार्थः द्वितीयसूत्रार्थस्तु स्पष्टः एवं
सूत्रद्वयं प्रसक्ताधिकरणशेषत्वेन व्याख्यायाधिकरणान्तरपरत्वेनापि व्याचष्टे यद्वेति प्रसक्ता
न्तमसमाप्यान्तराचिन्तायाः फलत्वमाह प्रसक्तेति तिनयसिद्धोऽदृष्टोऽन्यभवतीत्यन्तराचिन्तेत्यर्थः न
नु तथाप्यन्तराविचारस्य न पूर्वपक्षे संगतिस्तत्राह तदीयेति प्रसक्ताधिकरणपूर्वपक्षन्याये
नेत्यर्थः उतेति यद्यपि प्रणीताः प्रणीयन्त्विति प्रणीता प्रणयनमात्रार्थत्वेन गम्यते न तथापि प्रण

१४ संस्कारकतयाभिहितस्यवाग्यमस्यतांसहविष्कृतावाग्यंविसृजेत इति श्रवणात् तावत्कालीनुधृत्युपशमात्त्व संस्कार्यत्वमुपपन्नं कर्त्त ४१
१४ देवमुक्तं नतु तस्य यज्ञार्थत्वाभावेयत्नेन निनुमितिकथं तत्राह वाग्यमश्चेति एवं च यज्ञसंयोगाभावात्तस्यासन्नता ४१

शा०३।१।२ ष्यन्निति शब्दार्थेकर्तृत्वं कथनाय नहविष्कृदाह्वानमध्यगतिसर्वपदार्थार्थित्वादवश्यकर्तव्यत्वं चांगत्वं न पूर्वेणप्रयु
८ क्तत्वमेवेत्याह तस्मादिति प्रथममित्येतत्प्रयोगात्याप्यत्वेनेन संबध्यते प्रकृताधिकरणसिद्धांतमाह स्थि
तादिति प्रवृत्तिविशेषकरत्वमुक्तमित्यरुच्याह अपि चेति एवं च प्राथमिकप्रयत्किंचिद्ध्रुमस्त्वात्
रोधेन जघन्याप्राचीनशाहृत्याभागवाचकस्यनेहोर्तिपदार्थलक्षणापिनदोष इति भावः सूत्रे प्राग्भा
गदेश संबंध मुपांशुत्वं तत्प्रागवृत्तिपदार्थानां धर्मस्याश्रुतिनिर्देशात्तत्र यमर्थः प्राचीनशाबः साकां
क्षत्वाद्द्रव्यं निराकांक्षीकर्तव्यस्तत्र यत्तमाहेनश्रुतेव निराकांक्षीकरणेन संभवतित्वराशब्दसं
बंधित्वाच्च स्यान्तन्त्रमाश्रुतोन्यायत्तशब्दः कल्प्यस्तस्माछ्रुतेनाग्नीषोमशब्देन निराक्षीकरणेन संभ
वतित्वराशब्दसंबंधित्वाच्च स्यान्तन्त्रमाश्रुतोन्यायत्तशब्दः कल्प्यस्तस्माछ्रुतेनाग्नीषोमशब्देन श्रीएम:
निराकांक्षीक्रियतेनतन्त्रमाग्नीषोमीयस्यानवयवित्वेन प्राचीनशाहस्यावयवलक्षणभागेप
रत्वासंभवात्प्रागवर्तिपदार्थपरत्वाव गंपभावान्न द्वमेउपांशुत्वं तदपूर्वेणप्रयुक्तं तस्यापूर्वस्य तेषु भाग ८
संबंधिपदार्थेष्वभावात् ॥ अग्नि ॥ ननिह संधिर्नोपलभ्यतेतत्राह अग्नेसंधिश्चेति पुरोषक्षत्रत्वात्त्र

स्य क्षेपणात्तुपलंभेष्वनुमीयत इत्यर्थः तस्मादिति अत्रेदमनुमानं सूचितं इमा इष्टका न स्वारब्ध
द्रव्यवत्यः एकाकर्षणेप्यनाकृष्यमाणापरत्वात् समुदायवृत्तित्वात्प्रत्यक्षयोग्यसंबन्धिमत्वाद्वाव्य
तिरेकेणाकरादिवत्कपालादिवच्चेति एकेति इष्टकाः एकाः पुरीषमाममिति बोध्यं । प्रत्येकमि
ति व्रीहीणां तु चतुर्मुष्टिपरिमितानां भारवार्थत्वात् शास्त्रार्थस्यैव प्रोक्षणसंस्कार्यत्वान्न तत्र
प्रत्येकं प्रोक्षणमिष्टकानां तु वज्रिणीरूपद्धानीत्यादिषु भेदेनैव शास्त्रार्थत्वात्तत्र तु द्वैयं प्रो
क्षणमिति भावः ज्योतिष्टोमेति परमापूर्वप्रयुक्तिं ज्योतिष्टोमप्रयुक्तौ पर्यवस्यतीति भावः प्रा
संगिकीति अत्र ध्यायानंतरं चेति शेषः सत्रे अग्निधर्मः प्रोक्षणादिः पत्नीष्टकं स्यात् संघातस्यैवाग्नि
शब्दवाच्यत्वाच्चतुर्होत्रा पौर्णमासीमभिमृशेदितिवत् ॥ पत्नी ॥ समुदायश्च संगादहः समुदाया
त्मक हा द्वशाहगतपत्नीसंयाजांतत्वं चिंत्यत इति संगतिः संतिष्ठंते समाप्यंते तदा उत्तमममत्यं अवि
शेषात् नियामकाभावात् संस्थितिः समाप्तिः उत्तरार्थं शंकोत्तरत्वेन व्याचष्टे स्यादेतदिति साचे
ति उत्तमेहनि समाप्तिसत्वादिति भावः अर्थवादः मेनस्य न्तं क्रियतेवडे तु वक्तिगदार्थवादः वा

इति

शो॰टी॰२ कोतिस्कृत्यर्थो दर्पिवाक्यशेषात्स्फुटः सालंबनत्वायस्कृत्यालंबनभूतसंस्थाभाववत्त्वेव्यव
२ स्थाप्यते॥ अत्राक्रमाः ताकीराउपदध्यादित्यत्रो जनं तेजो वै घृतमिति वाक्यशेषात् साधनत्वेन घृत
इत्येत्यर्थः असंस्थितशाहस्य चिरसंस्थितत्वाभिप्रायत्वे उत्तमेहन्यपि स्कृत्यालंबनं संभवती
१ तिपरिहरति नैवमिति प्रोषमहः शेषं एवं च पूर्वपक्षे उत्तमेहनि हार्योजनादिकमहः शेषवर्जयि
त्वावभृथादिकमेव कर्तव्यं सिद्धांते त्वहः शेषोपि कर्तव्य इति भेदः अपेक्षितविधानत्वमुप
पादयति द्वादशाहेति द्वादशाहेन प्रजाकामं याजयेदिति द्वादशयागाः सहचोदितत्वात्स
हकर्तव्या इत्यर्थः तत्रेति सांगानां प्रधानानां सहानुष्ठानं चोदितं तत्राग्नीषोमीयानानि पू
र्वांगानि अवभृथादीन्युत्तरांगानि च तंत्रेणानुष्ठेयानि तद्युक्तं तयाप्यथक्रूरथगेकैक
स्याद्वोनुष्ठाने सहत्वविरोधात् मध्यवर्तिनस्त्वावर्तनीयाः तत्र पूर्वोत्तरांगतंत्रतामात्रेणान सह
त्वं किंतु मध्यवर्तिषु याग्नेयाग्नीषोमीयवदेकस्य प्रधानस्यैकैकमंगमनुष्ठायापरस्याप्येकैके श्रीरामः
कानुष्ठानेन व्यतिषंगे सत्येव इह चाहर्भेदेनानुष्ठेयानां प्रधानानां व्यतिषंगेणानुष्ठानासंभवा २

वै.शू. १ न्मध्यवर्तिपदार्थे कस्मिंश्चिन्नैवं मह इत्यस्याप्योत्तरमुत्तमम ह रूपं क्रम्यानुष्ठितं चेदेवमहत्त्व
निर्वाह स्तत्र कस्मिंन्पदार्थे स्यायामित्यपेक्षायां पत्नीसंयाजान्तवा कांड्वर्तेतद्दत्यर्थः। अवि
शेषेति। अङ्गाः शाकैराइत्यादिरित्यर्थः। वाकाशेषस्येति निर्ज्ञोवैद्यनमित्यस्येत्यर्थः। कः पुनरिति
रि हायोजनाप्रहः शेषलोपश्चिंतायावाधलक्षणासंगतत्वादिति भावः। पूर्वेति द्विरात्रादिविकृतिषुद्वा
दशाहिकदशरात्रगतानां द्वितीयादीनामंत्येपियथा प्रकृति पत्नीसंयाजान्ततयेवानुष्ठानमि
ति पूर्वपक्षे तोहः सिद्धान्ते तु प्रकृतौ द्वितीयत्नया पत्नीसंयाजान्त[.]स्यापोहात्यत्नया सकलानुष्ठा
ति नमित्युपयोगविकाराद्दहः॥ अभ्या॥ विधायेति पंचदश सामिधेनीरन्वाहेत्यनेनेति शेषः। त्वक्षि
तायाइति प्रथमाशब्दस्य प्रबोवाजीयायां शक्त्याभावादिति भावः। स्वरूपार्थत्वेन अनर्थमादाह
त्वकार्यत्वेति प्रथमस्यात्मानस्य यत्कार्यं तत्त्वेन तन्मयुक्तः। अतो विकृतौ क्रुगंतरत्रिरभ्यासरू
पसंस्कारद्रुहितव्यइत्यर्थः। ऋगिति अन्यथा प्राथम्यस्य वरणोपहादिसाधारण्यान्नियमनन्स्त्री
लिंगतानस्यादिति भावः। प्राथम्येकार्येति प्राथम्यस्यानन्वयायोग्यत्वादिति भावः। कार्येति॥

शा॰टी॰८
१०

10

कार्येतिअर्थप्रतिपादनरूपेत्यर्थः ताइतिपदद्वयाभ्यासेपांचदश्यसंपत्तेरसंभवात्तदर्थमृचामेवाभ्यासवि
धानात्स्त्रीलिंगनिर्देशानुवाद इत्यर्थः एतेन सर्वत्र याज्यापेक्षितविधिलोपेन पत्नीसंयाजानत्वमुक्तमव
र्जमित्युक्तमेवं पांचदश्यसिद्ध्यर्थमपेक्षितऋगभ्यास एवविधीयतइतिप्रतिपादनात्संगतिः सूचि
ता सूत्रे सामिधेनीनां मध्ये प्रथमोत्तमाभ्यासः प्राथम्यसंबंधात्प्रथमशब्देनोपस्थितत्वाद्वा स्या
नधर्मः॥ इष्या॥ अभ्यासप्रसंगः संगतिः उक्तेतिप्रथमप्रयोगएवेत्यर्थः। दर्शादीति दर्शपूर्णमा
सावारभ्यमाण इतिवचनात्प्रकरणाच्चेतिभावः। प्रथमेतिपदद्वयेदमपिसमुच्चयोगः सिद्ध्येदित्यपि
ध्य शङ्कितिकार्येक्तं वसायगाचिन्तनिरासेनात्पर्येनतु दर्शपूर्णमासाभ्यां यजेतेत्येकशास्त्रचोदितत्वा
द्यावज्जीविकप्रयोगोपस्थितिः स्यात्तत्राह नहीति उक्तवाक्येकर्मार्थाभ्यासविधिर्न भवतीतित्व
नीयेत्युत्पादनादिति भावः पर्वेति पौर्णमास्यादिकामादिति भावः पुरुषस्यांगमित्यनेन तत्रकिमारभ
शब्दः दर्शपूर्णमासायपदस्यार्थमग्न्यन्वाधानाद्यमभिधत्ते। उत्ताप्रवृत्तस्यपुरुषस्याद्यंप्रवर्तनमिति श्रीएम:
तदर्थसंशयोबाध्यः अनयोर्दर्शपूर्णमासयोः तद्योगादिति लक्षणयेति शेषः कर्तृतारंभकर्तुः १०

ल्ड् इति कर्तृत्वाविशानजनुरोधेन ल्ड् द्वप्रत्यये पि स्रुसाधुत्वसंस्कारकत्वं गमयतीत्यर्थः। अतः क्रि
यार्थयोः क्रियायामुपपदे ल्ड्विधानात् हन्वारंभणीया क्रियार्थत्वं शोधार्थं भक्रियार्थत्वप्रतीतावपि नतत्स्वरत्व या २
मितिभावः। एवं चारंभार्थीयास्तत्सर्वा आरभमे द्वे आहृते स्याम् अचात्र सोस्सीसाशयेनाह्ह आधेति अत
इति आरंभयुक्तपुरुषसंस्कारकत्वादीक्षणीयादिवत्क्रत्वंगत्वादिति भावः। अथो॥ उपोद्घातत्वसंग
तु प्रसक्तं समाप्येदानीमध्यायार्थं कहेश्चिं सूत्र इति संगतिः अहृष्टार्थताप्रितिच्छेदः अभिधीयत इति लक्ष
णया बोध्यत इत्यर्थः न चैवं विकृतमात्र विलक्षणया स्यात् हि प्रकाशनसंभवा[illegible]न्नोहःस्यादिति वा च्य
ल प्रकृतौ लक्षणया आर्थिकत्वेन विकृतौ लक्षकशब्दोपादानायोगात् निरूपयिष्यते चैतन्नान्योहे सि
द्धांतमाह उत्तरत्राविति सत्रे मंत्राणाम् अर्थाभिधानद्वारा कर्मणि शेषभावात् सवित्रादीनामपि स्वार्थाभि
धानेन शेषभावे समवेतार्थत्वात् ऊह इति अर्थाभिधानसंयोगात् मंत्रेषु शेषभावस्यादित्यनेन पूर्वपक्षः
प्रतिपाद्यते न त्वोत्तम चोदितार्थकं सवित्रादिकम् ऊहं प्राप्तं मंत्रस्य चोदितार्थकत्वात्॥ गुणा। नत्रैवेति अ
नेन संगतिः स्तु चिना अग्निनेति चतुर्थी। निर्देशादग्निनेति कर्तृत्वेनानन्वये पि तुष्टमित्युत्स्य कर्त्रपेक्षा
यां सन्निधानादग्नेरेव कर्तृत्वं। अग्नय इति वचनादर्थ्ये च तुर्थीन याचाग्निनासवितमग्न्यर्थं यजेत्तं निर्वपामी।

शा॰दी॰टि॰ न्मुच्यत इत्यर्थः ॥ इष्टायत्तावहन्न चेति । पुरोडाशावत्स्थायां नन्त्रेवनादिति भावः । सवित्रादिषदत्र दिति
११ अनेन संगतं समरं सत्त्वितं निर्वापकरणादिति तुश्शब्दः ध्यकहृति निर्वापकरणिकाकीर्त्यत इत्यर्थः न देव
स्कुरयति निर्वापेति एवमपि भूतनिष्ठानुपपन्नित्त त्राह पयोति आमासायां भूतवचेति निष्ठेति भावः सत्त्रे
तु हविःशेषलीभूतोऽग्निशश्चापि सवित्रादिवन्नोत्यः ॥ एवं चाउतेति समवेतवचनत्वादिति शेषः सि
द्धांतमाह लक्षणायेति नाहत्स्वार्थ इति अहत्स्वार्थलि प्रसंगसहितोधान्यमसिद्धि तु हि देवानिति हविर्दि
तंडुलानधिवपतीति मन्त्रविनियोग एव लक्षणातात्पर्यं ग्राहक इति भावः नरसेति शाकानामयनेऽग्र
हपतिर्मृगयापाति सयान्नमृगानुहंतीति तेषां नरसमर्थाः पुरोडाशा भवंतीति विहित इति शेषः ननु
प्रकृतौ विकृतिवाचकं धान्यशब्देन विकृतिभूततंडुलप्रकाशनवदिहापि प्रकृतिवाचक मृगशब्देनै
व मांसप्रकाशनं युक्तम त आह आर्थिकीति प्रकृतिलक्षणायावेकृततंडुलेषु विधान्यशब्दस्य
मांसे प्रवृत्त्यसंभवात्तन्निहत्तोऽशक्तान्तरावश्यकत्वे वाचनिको मांसशब्दोपादेयो न लाक्षणिक मृगशब्द श्रीराम॰
दः प्रकृतौ लक्षणया प्रकाशनस्यार्थिकत्वेन शास्त्रार्थत्वाभावादिति भावः इदं च कृत्वा चिंतया मांस ११
स्य यषणाभावान्नदर्थाधिवापांगमंत्रस्य तत्र निवृत्तेः सत्त्रेऽग्रणमाह अग्रस्त्वार्थेकृशाट्र ॥ चोदिते ॥

उपहूता इति अत्र दैव्या अध्वर्यवे उपहूता उपहूता मनुष्या य इमं यज्ञमवान् ये यज्ञपतिं वर्धानिति पाठे व्या
ध्वर्यवे उपहूता यज्ञमवान् उपहूता मनुष्या यज्ञपतिं वर्धानिति अन्वयमभिप्रेत्येत्यमुदाहृतं किमेत
दिति सामान्यापेक्षया न पुनरुक्तं बोत्साहेतिये मनुष्या यज्ञपतिं यजमानं वर्धयन्तीति यजमानहृदि
प्रकाशनेनोत्साहजननादिति भावः प्रकृतौ लौकिकस्यापि यद्यूहस्तदा किमुत प्रकृतौ मुख्यस्य
यज्ञपतिशब्दस्येति संगतिः इडामन्त्रे तिपद यज्ञपति मन्त्रस्य इडामन्त्रानन्तरपठितत्वेन तदेकवाक्यत्वादिति स
र्थः। प्रत्यक्षेतिरिडोपहूते तीडामुपह्वयत इति श्रुत्या इडामन्त्रस्य यज्ञपतिमन्त्रानन्तरपठितेनोपहूते द्यावापृ
थिवी इत्यादिना इदं मे देवा हविर्जुषन्तामिति तस्मिन्तु पहूत इत्यनेन सहैकवाक्यतामंगीकृत्य इडोपहूते ति
यज्ञलोकेन कृतस्य विग्रहस्य इडोपह्वाने विनियोग इत्यवश्यं स्वीकार्यं अन्यथा उपहूते द्यावापृथिवी
त्यादेर्लिंगेनाथन्यत्रा विनियोगादानर्थक्यापत्तेः तथा च तन्मध्यपतितत्वात् यज्ञपतिमन्त्रस्यापि तदे
कवाक्यतापन्नस्योक्तश्रुत्या इडोपह्वाने एव विनियुक्तत्वान्न दुर्बललैंगिकविनियोगाप्रकररयर्थः।
यज्ञहेनेति वर्धानित्याख्यातेन यच्छब्दोपबंधबलेन ये यज्ञपतिं वर्धयन्तु समर्थास्ते मनुष्या इति ज

उपहूताइति मनुष्यविशेषणान्नैषेवहृद्धिः प्रकाशयत इत्यर्थः ततः किं तत्राह लिंगादपीति लिंगात्स्वार्थे
न प्रकाशनमिति यत्तन्नेत्यर्थः । तथा चोद्दिशेषणाय हृपनिशन्नूः सुतं परार्थे इति भावः विकार इत्यादि
सूत्रं प्रत्युदाहरणपरतया व्याख्यातुमाह पत्नेति मन्त्रे चोदितेपि यज्ञपतिशब्दे परार्थत्वादि उक्तत्यर्थ
त्वाद्विकारो न हस्याधिधिवत् यत्र परार्थेन यायजमानो विधीयते उक्तं यजमानोन्वारभत इत्यादौ तत्र
त्रयर्थेके नापि तन्निर्दुष्टेवमिहाप्येकयजमानदृष्टिप्रकाशनेनापि स्फुटमिति सिद्धं ॥ विकार ॥ प्रहरणा
र्थत्वादिति सूक्तवाकेन प्रस्तरं प्रहरतीति सूक्तस्य विनियोगादिति भावः स्फुटार्थमिति प्रहरणेत्यादिः
अतो नाशुराहिफलविवक्षेति भावः । ननु विवक्षितफलप्रकाशनेनैव तदंगत्वमस्त्वित्याशंक्याप्रस्
तरप्रहरणफलत्वे प्रमाणाभावादाशुराशीर्विशिष्टयजमानप्रकाशनमदृष्टद्वारेण प्रहरणार्थमत
एकयजमानप्रकाशनेप्यदृष्टसिद्धेर्नोह इत्यभिप्रेत्याह [illegible] एवं सर्वे वेदन्यूह इति संगतिः सूक्तेति सू
क्तवाकेनेति नतीयेत्यर्थः अन्यथेति तत्प्रकाशयानां फलत्वं विनेत्यर्थः पर्वे तत्र परतुहृदेर्यजुहोपबंधे
न परार्थेन तत्याप्रकाशत्वान्न फलत्वमिति वैषम्यमिति भावः । स्फुटार्थत्वेनादृष्टद्वारकत्वेनुजयमे

त्रादिवत्करणत्वं तस्यादित्याशयेनाहक्रियामिति तथा चतन्त्रकाभ्यां ग्न्यादीनां देवतात्वेनसाधन
तयासंबंधित्ववद्धागुरादीनां साध्यतयासंबंधित्वमिति भावः अत्रत्वमेवफलत्वमन्यार्थतयान्वती
येनृदितमित्यपुनरुक्तिः सूक्तवाककरणत्वस्य तदीयफलप्रकाशनैकनिर्वाह्यत्वादिति भावः कर
णमिति प्रहरणेत्यादिः ततः किं तत्राह नचेति तस्य यजमानस्य सूक्तवाककरणकप्रहरप्रहरणा
नुष्ठानासिद्धेरिति भावः सत्त्वेयजमानप्रधानेऊहस्यात्।। अस्य।। वचनाद्धिति अग्निष्टुतोग्निदेवत्य
त्वान्यायादेवाग्निपदस्याग्नेन्द्रवचनमनुवादइति बोध्यं।। इंद्रेति रेहं चत ठि शेषरातानाम्रहोप्ययोगितत
याक्तं यजमानपदवदिहाप्यूहइत्युक्तिनैः संगतिः इत्यादिभिरितिरिद्दगुणप्रकाशकैरितिशे
षः।। अनूहइति अत्रन्यायेनानूहेप्यग्निष्टुतिहरिवदादिपदयुक्तनिगदानरपाठबलात्तस्यैवा
नुष्ठानेन प्राप्तस्याविकृतस्य इंद्रत्वविकरणं न्यायव्युत्पादनमात्रमिति तेन्द्र रत्नेसूत्रेहरिवदा
दिशाखानां तदर्थेषु हरिवत्तादिषु संयोगात्तेषाम समवेतार्थत्वात्तद्विशिष्टहरिवदादिविशिष्टमद्
प्रतीयेतेनतन्नूहितव्यं।। एवंवा।। त्रिवत्सइतिवत्सः सांउःसोमक्रयणइति चोदितइतिशेषः त्रिव

श्रा॰ श॰ ९ त्वास्विष्टवत्कः किमदृहितत्वानियमः यद्यपि सिद्धांतेपितस्य श्रुतत्वस्य दृष्टत्वेवंरूपो लिंगो ह्यो स्त्येव तथापि किं
१२ लिंगवत्श्रुतदध्यादीनामप्यूहः उत लिंगमात्रस्येति संशयः इत्यर्थो बोध्यः तथापोति च्छन्नेन श्रु
ताद्दीनां सन्नावघातिपादेनन पूर्वैवैषम्याम्लगतिः सांचिता ऊह इति श्रुतदध्यादिशाह्यांश्च स्त्यक्ता त्रि
13 वत्वत्तगयुगावाचिनः प्रयोक्तव्या इत्यर्थः। सूत्रेह शिवदादिदिषिव ष्ट्रतादिषु योजनीयं। लिंग॥
ननु पशुधर्माणामग्नीषोमीयधर्मत्वस्यात्त्वनीयव्यावस्यापत्रा दृतिदेशेन मेष्यां इहत्रेः कथ
मयं विचारस्तत्राह तत्रेति अस्य तुल्यः सर्वेषांपशुविधिरिसाधिकरणपूर्वपक्षप्रयोजनविचार
त्वान्नानुपपत्तिरितिभावः। सामानविध्यं कृत्वा चिंत्यत इत्यपि बोध्यं। अध्रिगुवचनमिति अ
ध्रिगुर्देवशामिता अध्रिगुश्चापापश्च उभौ देवानां शमितारावितिवचनात्तत्संबोधनेनप्रहृत्ते
दैव्याः शमितार इति निगदोध्रिगुवचनं बोध्यं अप्रवृत्तिरिति अनेन मेष्या अन अभिधानमात्रं विव श्रौ॰ एम्र॰
क्षितं न तु मंत्रस्य निवृत्तिरेव चत्वुर्णां पशूनां समुच्चितानामालभ्यतयाध्रिगुवचनस्य प्रतिपश्वावृत्य १२
भावेन चेतरपश्वर्थतया वचनमनादृत्य प्रवृत्तस्य वशयंभावादिति बोध्यं। बाधरूपनिवृत्तिविचार

स्याशसंगतिरित्यत आह सिद्धांत इति अग्नीषोमीयपर्यंत सिद्धांत इत्यर्थः तथा च पुल्लिंगस्य पशुत्वा
भिप्रायत्वे पूर्वपक्षे यथा मेध्यां प्रवृत्तिस्तथा सिद्धांतेपि तदभिप्राये ऐव पुल्लिंगोपपत्तेः शब्दविकारे रो
वप्रयोगस्यादतः सिद्धांते व्यूहस्याप्यतदधिकरणव्युत्साधपुल्लिंगासमवायाधीनत्वादत्रैव संगत्यसं
गतिरिति भावः। एवं च पूर्वाधिकरणस्यालिंगोहोपगमेन प्रवृत्तेस्यहापि लिंगोहव्युत्पादनात्संगतिर्बो
ध्यास्तत्र समानविधानेषु पशुषु सारस्वती मेषी अग्निषु द्विवचनमप्याम्नात क्किं न्तु पुल्लिंगनिर्देश इ
स्याश्च स्त्रीत्वात्।। आम्नात।। सामप्रदेशे विकार इति सूत्रपर्यंतं करिष्यमाण विचारस्य संगतिमाह
साम्नामिति ऊहे ऊहविचारे च्यामिश्रमानतिरुक्त्या यादे सामप्रदेश इत्यारभ्येति शेषः ननु न सा
म्नामूहः संभवति प्राकृतद्वारा द्वारांतरसंबंधाभावादभिव्यक्तिरूपद्वारस्य सामान्यात्तत्राह तानीति
द्वारांतरेपदेनाभिव्यंग्यांतरमेव साम्नो हे विवक्षितमिति भावः अस्याधिकरणस्य संगतिमाह त
त्रेतियथा द्विवचनस्य मेष्यामप्राप्तिरेवमि राय दे गिराय दगी नेर प्राप्तो गिराय इस्यानापत्तिरि वि
चार्यत इत्यर्थः। उक्तसंगति लोभात्साम्नो प्योढ्रांताप्यत्र कृत इति बोध्यं यज्ञायज्ञीय इति यज्ञायज्ञा

शा॰टी॰
१४
14

वो अग्नये इत्यस्यां यज्ञायज्ञशब्दयुक्तायामृच्युत्पन्नमाग्निष्टोमसाम यज्ञायज्ञियं तत्साम्निधा
ह्यग्निष्टोमस्तोत्रप्रकरणाद् इत्यर्थः ननु एवं रूढत्वमिति गिरापदस्य वाचनिको गानसंबंधः गिरापदस्य तु का
र्यान्विकृत इत्यतुल्यबलत्वात्कथं विकल्प इति पूर्वपक्षस्तत्राह नवेति स्तोत्रसंबंधो वेति गानसंबंधस्य वावि
धानाद् इत्येतत्स्तोत्रसंबंधविधानमिति भावः तदेवोपपादयति प्रकरणात् स्तोत्रांगस्यैवैरापदस्य पञ्चायज्ञीये
न स्तवीतेति स्तोत्रांगतया विहितगानसंबंधो येत्राप्तः अप्रगीतस्य गानसाध्य स्तुतिसाधनत्वानु
पपत्तेरिति भावः अस्यैवेति सिद्धांतेनैव वक्ष्यमाणरीत्येति भावः श्रुत्येति यद्यप्यैरं कृत्वोद्गेयमिति वाक्ये
न श्रुतिस्तत्र नीयायभावात्तथापि गिरापदस्य यज्ञायज्ञीयेन स्तवीतेति स्तोत्रांगतया विहितगानसं
बंधोर्थप्राप्तः अप्रगीतस्य गानसाध्य स्तुतिसाधनत्वानुपपत्तेरिति भावः अस्यैवेति सिद्धांतेनैव
वक्ष्यमाणरीत्येति भावः अस्यैति यद्यप्यैरं कृत्वोद्गेयमिति वाक्ये न श्रुतिः प्रगाथैकवाक्यतया गान
संबंधो नैव गिरापदस्य किंतु विशेषतः स्वाभिक्षायके रामुत्यैवैत्याशयः ननु वचनस्यैरापदे सन्निमा
त्रपरत्वमुक्तमिति वाच्यं इरापदस्य लोकसिद्धतयोत्पत्तिविध्यनपेक्षतया तद्धि नियोगपरत्वाभ्युप

श्रीराम॰
१४

कत्वात् प्रगाधेति यत्तद्वपरेखक्रमेणोः पादेयुनरादधीतेति प्रगाधेन प्रगाधनेनेति चत्व संपत्तिः सप्र
गाधः प्रगाधस्य प्रगानस्य वेधेन देकवाक्यतापन्नत्वा द्विरापदस्यापि सः ननु स्वरूपेणैव हानेनेत्यर्थः । क्रमा
द्धितियन्नायसीयसाम्नो यत्किंचिद्रगक्षराभिव्यंजना । कत्वेनापि स्तोत्रसाधनत्व सिद्धेनेत द्वलेन गिरापद
स्यस्तोत्रांगत्वं किंतु यथासंख्याम्नानलक्षणात्क्रमादेवेत्यर्थः । नन्वितियन्नायतीयप्रा ह्यस्यसा
मवाचकस्य लक्षणायातद्धास्यय इत्यपरत्वादिति भावः । नन्वेवमपि ऋगंतराभिव्यंजकेनापि साम्नः
स्तोत्रसाधनत्वोपपत्तेर्नैव प्रहृत प्रगाधग्रहणं स्यात् तत्राह तत्रेति प्रगाधस्येति तथा चान्यत एव प्रहृ
त प्रगाधस्य स्तोत्रांगत्वसिद्धेर्न लक्षणास्वीकार्येति भावः । अभ्युपेत्याप्याह तत्रापीति सत्रेज्योति
ष्टोमाधिकारे आम्नानाद्विरापदादन्यद्विरापदे प्रत्यक्षवचनविहितत्वान्निसंगिरापदविका
रसिद्धाधकः ॥ अग्र ॥ नियतमितितथा चावसरः संगतिरितिभावः स्वार्थ इति । प्रत्नादेराकृतिग
णत्वादिति भावः । हस्तमिति ह्रस्वप्रथमद्विती यंतरतौ यचतुर्थेभ्यं द्वादिति स्वार्थलक्षणाः समहस्तौ दोगा
नां स्वराः संज्ञित्वहस्तमिति प्लुतस्य संज्ञा तत्रतौ लव्यं प्रथमस्य रेचक हस्तं भवतीति विधानादिरापदे इकार

स्य तालव्यत्वादृहङ्गाने यो निवन्त्स्वराभवं नीत्यतिदेशेनर्गाणं इङ्गतत्र प्रथम स्वरत्वा
च्च प्लुतलक्षणावृद्धो हृ हं तालव्यमापि भवतीत्याईभावे ऋग्गाइराशब्दस्य हृदिये स्याचामाहृत्त हृहृमि
तिहृहृत्वाहृ ह्वाच्छ इति छन्दत्यये आयीरीय भिति प्रसज्येतेत्यर्थः यद्यपि हृह्वाच्छोयं शे विकोन
स्वार्थिकः तथापि स्वार्थस्येवमेदं परिकल्प्यत स्येदमित्यर्थे हृह्वाच्छ इति कथंचिद्योज्यं स्वार्थि
कत्वेऽनर्थकादाहृग्गाप्योतियद्यप्यप्रमाणं प्रगाणाभावो न विकारस्तथाप्यप्रगाणाशब्देन
तत्सहचरितत्वात् स्वार्थादिविवक्षितमिति न दोषः गिरापदस्यानइति न गिरा गिरेति ब्रूयाद्यदि
गिरा गिरेति ब्रूयादात्मानमेव तन्निर्देशं कृत्वो हेयमिति वाक्ये हि गिरापदनिषेधस्यानुवादत्वाभा
वे तस्यापि विधेयत्वापत्तावगोरवात्स्यान विशेषासंयोगेन श्रूयमाणस्य गिरापदस्य यत्र स्या
नेविधोसति गिरापदनिषेधस्यानुवादत्वसंभवतितत्परत्वं विधेरितिभावः॥ ॥ इति श्रीवंपक श्री एम-
नाथ कृतौ शास्त्रदीपिकाप्रकाशे नवमस्याध्यायस्य प्रथमः पादः॥१॥ ॥ सामा॥ ॥ अत्र सा १५
मोहाभ्यं त्यत इति पाहां नरत्वं सामो होपो द्वातस्यां तरसंगतिलोमेन पूर्वपादे प्रक्रांतत्वादानंतर्यं च

उत्तरेति गीतिवचनत्वे सत्वे ब्रूहि किं सामानि ऋचः प्रधानानुतगुणभूतानीति विचारो घटत इति
भावः सूत्रे प्रगीतमंत्रः सामेत्यध्यापकस्मरणादहे बुद्धिय मंत्रमेगेयाय ऋचः सामानीति मंत्रे सा
मशब्दोपदेशात्स्वप्रगीतमंत्रमेव सामाम्नायके मन्यंते ॥ एवं ॥ योयमितिः । यस्मिन्ग्रंथे सामगाएकै
कं सामत्रिचे धीयते सग्रंथविशेष इत्यर्थः नहीति गानस्य योनिवदुत्तरयोरध्ययनसिद्धत्वेत्राना
म्नानकृ कृसंचारभावेनोहत्वं न स्यादन्यथा योनिगानस्याप्यूहत्वस्यादिति भावः । किंचेति पघो
न्यामिति । वचनेन योनावाम्नानासिद्धस्य साम्न उत्तरयोः पुरुषेणस्वयमनुष्ठेयत्वं गम्यते तेन तस्य
स्पष्टं पौरुषेयत्वमन्यथा पघोन्यामितिवाक्यमनुवादकं स्यादितिभावः अनुवादत्वांगीकारेप्याह
नुहीति तदानिस्सरणमपि योनिस्थापत्स्यादयं योनिरिमे उत्तरे इति विभागायोगादिति भावः नन्वनाद
रेनोक्तत्वबुध्यानुष्ठानं स्यात्तत्राह नहीति प्रत्यये विश्वासः चिंताफलमाह तस्मादिति अस्या
धिकरणस्य सामौहोपोद्घाततयात्र संगतिरित्याशयेनाह इतिन्यायत इति सूत्रे सा मानि ऊहसा
मानि मंत्रभूतान्यार्षोणीत्येके मन्यंते अध्येतृणां नित्यत्वस्मरणात् ॥ कर्म ॥ यदर्थगीतिः सामे

शा.टी.२ तिस्मारितं नन्दिह्नानी चिं स्यात् इत्यत्र स्मरः संगतिः अकर्मकाल इति। अध्यायनकाल इत्यर्थः। नहीतिमन्व
१६ स्यतिद्वारा करोतीति वाच्यं। औदुंबर्याः स्पृष्ट्वोद्गायतीति वा कालकर्मकाले गौणत्वं [illegible] वेनततन्न ए
वनदानस्मिहुरितिभावः। अथेति। तथाचाधानवत्कर्मकालेऽप्रयोगउपपन्न इति भावः। नहिं नद्दृ देवऋतु
16 मध्येऽप्रयोगो न स्यादित्याह नन्विति। प्रधानकर्मेति। असंस्कारकर्मेत्यर्थः। फलार्थे इति विश्वजिन्न्याया
दिति भावः। दृष्टफलत्वन इति स्तुतिर्दृष्टं फलं ग्रहणेति सामस्येति शेषः। शिक्षार्थे मितिन्नदपि दृष्टा
र्थमेवेति भावः। पूर्वपक्षे साम्नः प्राधान्ये प्रधानभूतगीत्यभावपरिहाराय योनिवर्णेषु गाने सि
द्धांते तु ऋगक्षराणां प्राधान्यादुत्तरावर्णेषु गानेऽन्यथाक्षरसंस्कारे योगादिति प्रयोजनमूहो
पाद्वानत्वं च बोध्यं। स्तुतेः साम प्रधानकर्मेयतः प्रधानविधिलक्षणा द्वितीयार्थं इतरादिषु स्ति॥ त्र
चे॥ एकमिति। स्तोत्रसाधनीभूतमेकं सामतिसृषु ऋक्षु कर्तव्यमित्यर्थः। व्यासज्येति एकैकस्यामृचि श्रीरामः
ग= साम गीयोनकृत्स्नं सामेत्यर्थः। तदर्थमिति यदि साम न निर्वर्त्यं गानं न दातिसृभिरप्येकं साम निर्वर्त्यमित्य १६
वयवशोगानं यदि च स्तोत्रांगं न दाति सृभिः स्तवीतेत्यर्थपर्यवसानेन नतिसृणामप्यभिव्यक्तापेक्षायां अ

धानान्तुसारेणापरिसमाप्यगानमितिफलफलित्वंविधीयतइतिमिद्धिः सामनिवृत्तिंकुर्यादित्येव
मित्यर्थः नन्वितिवचनव्यक्तिरयुक्ताकृतांप्राधान्यान्नथाचनकृतत्रित्वस्यनसामांगत्वंतत्राह प्रधाने
त्विनहीतिप्रशस्तंचगानसमाप्तौगानानांभिन्नत्वान्नैकस्मिन्नूगानेत्रित्वमंगंसंपद्यतेइत्यर्थः। लक्षणेति
अभिनवप्रादुर्भावार्थकत्वात्करोतेरभ्याससस्यचैकैकस्यैवपुनःपुनःप्रादुर्भावरूपस्यातथात्वादिति
भावः। ननुस्तोत्रीयसामोद्देशेनस्तुचविधौविशिष्टोद्देशाद्वाक्यभेदःस्यादित्याशंक्याह स्तोत्रीयत्वेनसा
म्नउद्देशः साममात्रोद्देशेनत्रित्वविधानेपिव्यामज्यगानेयत्तायज्ञीयेनेत्याहविचनेति नएवगर्भस्तोत्र
साधनत्वंसाम्नांनस्यादतोनसामांगंत्रित्वमितिद्रष्टव्यमित्याह ततोर्थंनरमितितिरथंतरमेवसामसाधनकं
दृष्टस्तोत्रंकुर्यादित्यर्थः अघटनमेवोपपादयति स्तोत्रसाधनत्वादिनाशब्दाभिव्यक्त्याचेतित्रनेनपूर्वो
क्तसाम्नामृगभिव्यंजनकत्वमुपजीव्येनप्रवृत्तिद्वारेन प्रवृत्तेः संगतिः सूचितातस्मादितिप्रत्येकमेवची
स्तोत्रसाधनत्वादित्यर्थः। ननूक्तरीत्यानसामोद्देशेनत्रित्वविधिश्चेत्तर्हिकिमुद्देशेनसः एकत्रसरतामंग
मियाकृयद्देशेनापितद्योगादित्यतआह एवंचेतिप्रकरणेनस्तोत्रीयशब्देनवोपस्थितंस्तोत्रमेवा

नृघति स्तृभिं स्कृवीतेतिति त्रित्वमंगे विधी यंतेतत्र क्रमप्रकरणाभ्यां स्तोत्रांगत्वेनावगतानां क्त्वचस्य स्थित्त
स्यपरिच्छेद्यत्वेनान्वियंतेतदनुवादस्थत्तृचशब्दाव यत्र कृशब्द इति भावः। स्तोत्रांगत्वेन त्रित्ववि
धेः साम क्रियत इति कथमन्वय स्तत्रा हतेद्विधानइति सूत्रेत्विचेव्यासज्यगानेस्यान्न साम क्रियत इतिसा
मनिर्देत्रेः श्रुतत्वात्तत्रैवत्रित्वान्वयात्तयद्यक्रियत इत्यनेनत्रिशब्दकृशब्दार्थयोः संबंध विधानेपर
पदसंबंध विधानाद्वाक्यं स्यान्न क्रियत इति धात्वर्थसामकरणे त्रित्वविधाने तु श्रुत्यनुग्रहः॥ तद्॥ स
मास्विति योनिसमच्छंदस्का सुतद्विषमच्छंदस्का सुवेत्यर्थः प्रसंगः संगतिः संशोरजिसेवारः सा
म्नोहिं साविलेशाल्यत्वयद्य धिकच्छंदस्कायां योनावुत्पन्नं साम न्यूनच्छंदस्कयोरितरयोर्गीयेत नत
दासामेकदेशानेव नहगक्षराभिव्यक्तिप्रत्रैरवशिष्टः सामभागस्त्राश्रया भावाद्विस्येत यदिच यो
नेरप्यधिकच्छंदस्कयोर्गीयेत तदासाम्नोल्पत्वादवशिष्टस्त्रग्भागः सामरहितत्वादनभिव्यक्त एव
स्यादिति भावः अयं च विचारो यत्र साम त्युत्तरार्यथैयानेरुत्तरेरिचो नपठितेतद्विषयो बाध्यः अ
न्यथायथोन्यादुत्तरयोरितित्वचनेन विषमच्छंदस्कयोरप्युत्तरयोरेव गाना व श्यं भावाद्विचारानवका

शात्॥ नैमि॥ सामगानां रथंतरादिसामयोनी नामैकपाठात्मक एको ग्रंथः छंदो नामकः तथा ए
कस्य साम्नो योनिपाठानंतरमयोनिभूतऋग्द्वयपाठः क्वचिदेकऋक्पाठोपि ततः सामांतरयोनि
पाठ इत्येवं योनितदुत्तरऋक्पाठात्मक एको ग्रंथः स एवोत्तराग्रंथ इत्युच्यते एवं स्थिते संदिह्यते किमि
ति योनिग्रंथपठितयोरुत्तरयोरुत्तराग्रंथपठितयोरुत्तरयोर्वेत्यर्थः सर्वत्र संभारादिप्रसंगलक्ष
णानियामकात्समाख्येति नियमे पीह नियामकाभावादनियम इत्युत्थानात्संगतिः संज्ञेति उ
त्तराच्छ्रध्यापयाम इत्यादौ प्रतिबंध्यनुपादानेनानन्यथासिद्धप्रयोगादिति भावः प्रकरणेति श्र
नियमपक्षे प्रकरणानुग्रहः पाक्षिकस्यादिति भावः सूत्रे नैमित्तिकं संज्ञानिमित्तमेवोत्तरात्वं श्रा
नेतर्यात् प्रतिबंध्यापेक्षाकृतव्यवधानाभावात् प्रतीयते॥ एवं वा॥ पार्ष्ठिके पृष्ठ्यषडहस्थ एकविंश
स्तोमकः षोडशिसंस्थो वैराजाख्यपृष्ठसामा चेत्यर्थः समानगानस्यापवादात्संगतिः सत्येति वि
लेशाग्रहणं संपातायातं बृहत्योस्त्वित्यनुवादेत्यनुवादत्वादागातिजगत्योर्मुख्यवृत्त्या भावेपि
न दोष इति भावः॥ त्रागा॥ अभीति अभि त्वा स्यार्थंतरं त्वाभि ड्वा त्यस्या बृहदित्यर्थः तयोरिति न

शा०टी० १८ त्वावामितीयं पङ्क्तिरथंतरस्योत्तरासत्वेन प्रसिद्धत्वेनोयं बृहत इति विवेकः नवा इति एककंद्वे नगेय
१८ मित्यर्थः तत्र हेतुः यस्मिन्निति यस्मान्निमित्तात्त्या कुच इत्यर्थः पङ्क्तिरनिष्ट विनाभैकेकां पङ्क्तिं परित्यज्येत्य
18 र्थः ककुभात्विति उत्तरान्निककुभादित्यर्थः उत्तेति योनिं बृहतो उत्तरां पङ्क्तिं चेत्यर्थः अत्र अभित्वा
शूरेत्यादि ईशानमिन्द्र तस्थुष इत्यन्ता योनिबृहत्या प्रथमतो रथंतरे गेये सैका स्तोत्रीया ततः क
कुबुत्तरा गायत्र्यगानेन तत्प्रकारस्तु ईशानमिन्द्र तस्थुष इति पादं पुनरादाय नत्वावांअन्यो
दिव्यो न पार्थिवो न जातो न जनिष्यते इत्युत्तरस्या अर्धेन सह गानं त्र्यं सैका त्रियदाष्टाविंशत्य
क्षराककुब् द्वितीया स्तोत्रीया न जातो न जनिष्यते इत्युत्तरस्या अर्धेन सह गानं त्र्यं सैका त्रियदा
ष्टाविंशत्यक्षराककुप् इति पादं पुनरादाय अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामह इ
त्युत्तरस्या अवशिष्टार्धेन सह गाने अपराककुत्संपद्यते सा तृतीया स्तोत्रीया एवं बृहत्यपि योज्यं
पूर्वत्र गौणस्यापि जगती बद्धत्वस्य गृहे पीठनगोमाककुबुर्यग्रास्थमित्युक्तिः संगतिः स्मरणा श्रीराम:
दितियाति कानामिति शेषः प्रकृष्टे गाने यत्र स प्रगाथः प्रकर्षश्च पादं पुनरादाय गानेनैवेति भावः १८

दर्शनात् लिंगदर्शनात् सामान्येति एकं साम त्रिचे क्रियत इतोतिशेषः सूत्रे प्रगाथन निमित्तं गानं
स्यात् ॥ एवं वा ॥ रोरवेतिमाध्यंदिने पवमाने रोरवाख्यं योधाजयाख्यं च साम बृहतीछंदस्के त्रिचे
गेयमित्यर्थः तयोरिति उक्तयोरग्रेथे तयोराश्रयभूतः प्रगाथः ककुब्रूपात्मकश्चास्मानः तत्र पुनानः
सोमेत्येषा पूर्वा बृहती दुहान ऊधर्दिव्यमित्येषा द्वितीया विष्टारपंक्तिरित्यर्थः आनीयेतिविष्टारपंक्ति
स्यात् इति शेषः । प्रगाथनमिति पुनानः सोमेत्यस्या बृहत्यां यथापाठं गाने कृते तान् स्यात् एवं च तु
र्थपादं पुनरुपादाय द्विरभ्यस्य दुहान इत्यस्या विष्टारपंक्तेः पूर्वार्धेन संयुज्य गेयं तदा सा बृहती
द्वितीया संपद्यते तथा दुहान इत्यस्या द्वितीयपादलक्षणा प्रगाथनसंपादितायां बृहत्याश्चतुर्थ
पादं पुनरुपादाय द्विरभ्यस्योत्तरार्धेन सह संयोज्य गाने तृतीया बृहती संपद्यत एवं पठितयोः
व बृहती विष्टारपंक्त्योः प्रगाथनेन बार्हतस्तृचः संपद्यत इत्यर्थः । तच्चेति पूर्वत्र सामान्यवचन
स्य प्रगाथनेन समर्थनेपीह बार्हते तृचे भवत इति विशिष्यते च यथाग्रगणादन्ययोरागमनमिति विशे
षाशंकयोरस्थानान्नसंगतिः लिंगेति । षाढशिस्त्रिष्टुभो माध्यंदिने सवनमिति लिंगेत्यर्थः ते

शा॰दी॰२
१९
19

स्यायमर्थः माध्यंदिने सवने पवमानस्तोत्रमेकं चत्वारिंशदृचानीत्येवं पंचदशस्तोत्राणि तत्र पवमानः
पंचदशस्तोमः पृष्ठानि सप्तदशस्तोमकानि तत्र त्र्यशीतिस्तोत्रीयाः तासां काश्चित्पठिताः का
श्चिदूहेन लब्धाः काश्चिदभ्यासलब्धाः तत्र द्वादशककुभोष्टाविंशत्यक्षराः त्रयोविंशतिर्गाय
त्र्यश्चतुर्विंशत्यक्षराः पंचचत्वारिंशद्बृहत्यः षट्त्रिंशदक्षराः त्रिष्टुभश्चतुश्चत्वारिंशद
क्षराः तत्र द्वादश प्रगाथिककुभो द्वादशभिर्गायत्र्यर्धैः संयोजिताः सत्यो द्वादश त्रिष्टुभः संपद्यंते ए
वं च त्रिपादशेषा गायत्र्यो व्ययिताः अवशिष्टाः पंचदश गायत्र्यस्तासां पंचचत्वारिंशत्पादा
स्तावद्भिः पादैः पंचचत्वारिंशद्बृहत्यः संयोजिताः पंचचत्वारिंशत्त्रिष्टुभः संपद्यंते आम्नाताश्च
तिस्रः इत्येवं षष्टिस्त्रिष्टुभः संपन्नाः इयं च षष्टिसंख्या माध्यंदिनसवनसंबंधे प्रकरणे पठितापा
विष्टारपंक्तेर्बृहतीरौरवप्रगाथनऊहेनोपपद्यते उत्तरोत्तरस्तोत्रगाने तु पठितानां न्यूनत्वान्माध्यं
दिनसवने पठितानामृचां श्रूयमाणा त्रिष्टुप्षष्टिसंख्यानुपपन्ना स्यादित्यस्माल्लिंगादस्य ग
घनमिति ॥ एवं वा ॥ आर्भवे पवमाने अयावाश्च मांधिगवं च सामात्रुष्टुभे त्रिचे गेयमिति स्पर्धः तयो

श्री एमः
१९

रितिउत्तरायं ग्रंथेन पोः साम्नो राथ्यय भूतेन तेन स्तवो एव रोजितो वा अंधस मद्दे स्येयानुष्टुप्प योधारयापाव
कयेतितेदुरोषमितिवक्ष्ये उत्तरेगायत्र्याविसर्थः प्रगाथनेनेति। पुरोजितो वा अंधस मद्दस्य स्यायथापा
दंगानं कृत्वा चतुर्थे पादे पुनरुपादाय योधारयापाकवक्रयेत्यनया संयुज्य गेयं न स्याश्चांतिमे पादे
पुनरुपादायतेदुरोषमित्यनया संयुज्य गेयमित्येवं प्रगाथनेनानुष्टुप्त्रयं संपाद्यमित्यर्थः। लिं
गोतेरीतिचतुर्विंशतिजगत्यस्तृतीयसवने एकाचककुब्भिति लिंगश्चैवं तत्प्रगाथने एवायुपद्यते
अपूर्वयोरनुष्टुभोगानयने तु उत्तरायं यथपठिताभिरेव ककुब्भिः संख्यासंपत्त्यभावात् तस्यैवं वदेद्व लिं
गमिदमनुपपन्नं स्यादितिप्रदर्शनार्थमित्यर्थः तृतीयसवने आर्भवपवमान स्तोत्रे सप्तदशायहा
यज्ञीयमेकविंशामित्येवं स्तोत्रद्वयस्याश्रयभूतानां चोष्टत्रिंशत्तत्र षड्गायत्र्यः षडनुष्टुभः ति
स्रोजगत्यः एकाउष्णिक् पंचदशककुभः सप्त बृहत्यः ताभ्याक्षरगणाने या चतुर्विंशतिजगत्यः ए
काककुप् च संपद्यंत इति द्रष्टव्यौ॥ एवं वा॥ गवामयनमिति श्रभिवनोखं ब्रह्म साम पृष्ठस्येति शेषः
चतुरिति चतुरुत्तरशतसंख्याकाइद्देवताकाबृहतीछंदस्काः प्रगाथाः द्वोचाइत्यर्थः इहाभिस्

सुगानेपिप्रगाथसमाख्याग्रपत्निरिस्युत्यानाक्तंगतिः किमितिकिंपठितेषेवप्रगाथेषुऋकुप्रग
थनेनतिस्र गानसुतपादूपुनरारभतइतिन्यायेनपादप्रगथनेनद्वयोरेवेत्यर्थः प्रगाथनइतिपादप्रग
थनइत्यर्थः अन्याइतिपादप्रगथनेनुपादमात्रएवहि गीतेननतुकृत्स्नायामृचीतिऋगन्यत्वमु
पपन्नमितिभावः स्तत्रपादप्रगथनपर्यायोज्ञेयः ॥ अर्थे ॥ प्रकारइतिअक्षरविकारोविकर्षेणाभ्या
सोविरामस्तोभइत्यादयः तद्विधितेषांगुणत्वात्साम्नश्चप्राधान्यादितिभावः ॥ अर्थे ॥ पूर्ववदिहापि
विकल्पइत्युत्थितेः संगतिः स्तोत्रागीतिगुणाभिधानानीत्यर्थः। मुख्यस्तोत्रस्यप्रगीतमंत्रेसा
ध्यतयाश्रवेपक्षासंगतेः अन्ववायतआगच्छन्तित्यर्थः ननुसाम्नोऋचंविनास्तुतिसाधनत्वाभा
वात्कथंतयोर्विकल्पादिविचारस्तत्राहतत्रेतितयाचाप्रगीतयाऋचाविकल्पसंभवादितिभावः द्वयो
रितिऋचोसुग्रवशीकरणेनस्तुतिप्रतीतेः साम्नश्चासुरनिराकरणेनस्तुतिप्रतीतेद्वयोरपिविधि श्रीरामः
कल्पनेनविकल्पइतिभावः विस्पष्टेतिचासुराणांविघातकत्वेनैवप्रसिद्धेः ऋचोनिंदासाम्नश्च २०
प्रशंसाविस्पष्टावगम्याचोपसंहारेविधिश्रवणात्प्रशंसाचविनिगमकमितितत्स्यैवविधिः कल्प्यइति

भावः सत्रेककक्षमामयोस्तत्परत्वात्स्कन्त्यर्थत्वाद्देकार्थत्वे विकल्पः स्यात्तद्यद्वान्तःपरत्वान्तय
द्दचेत्यादिवास्य स्कन्त्यर्थं तयोर्भयविधिपरत्वात्॥ एवं वा॥ पूर्वेत्रविकल्पाभावेपीह विकल्प
इति संगतिः विशेषनिषु नीकेन प्रगीताप्रगीतयोरुभयोरपि ग्रहणाविशेषाद् इत्यर्थः प्रगाणार्थ इति
अप्रगीतायाः संहितायां ग्रंथे पाठात्तत्स्य च कक्षस्वरूपावधारणद्वाराप्रगाणार्थत्वादित्यथाप्र
दृष्टार्थत्वापातादिति भावः तदेवोपपादयति नहीति विनिश्चयात् इति प्रतीकेनेत्यादिः सर्वनाम्नेति
इहमापन्नतः प्रतीकोपादानकृतसन्निधानस्य प्रगीताप्रगीतसाधारण्येनोभयोरपि परामर्शग्रहत्वात्।
एवं वा॥ ऊर्ध्वं विच्छारत्वाद्यात्रे स्वर्येणाउदात्तानुदात्तस्वरिते : वा तु स्वर्येणान्ते रेव प्रचयसंहितेः स प्रमु
च्चय इति सर्वेशाखाप्रत्ययन्यायादिति भावः गीत्युपायवद्धितेर्गीत्युपायानामिव दृष्टार्थत्वादिति भा
वः नानर्थे केकश्रुत्संज्ञास्वरेतित्रैस्वर्योपधयनमित्यर्थः बहुव्रीहाविति बहुव्रीहौ समासे पूर्वपदं प्र
कृतिस्वरं भवति पूर्वपदस्य यः स्वरः स एवावशिष्यते न तु समासान्तोदात्तत्वमित्यर्थः सत्रेककक्षामशब्दः
चात्तु स्वर्योदोकपंचित्रेयः॥ सामा॥ उपोद्घातमिति आम्नातादित्यारभ्य प्रक्रान्तमित्यर्थः इदानीमिति

शा०दी० अवसरादितिभावः इत्याहिमिरितित्र्यतिदेशवचनेशितिशेषः अत्र योनिवर्णवैशेनगानस्मृतोजरा
२१ वर्णवैशेनेति तदर्थसंज्ञायमभिप्रेत्य फलफलिभावमाह यदीति योनिवर्णवैशेनगानमित्यस्य व्याख्या
यस्मिन्निति यत्स्थे स्वाक्षर इत्यर्थः नोह इति योनिवदेवोत्तरयोरपि सामगानेन विकाराभावादिति
भावः। उक्तं स्पष्टयति व्याख्या यस्मिन्निति योनौ यत्र चतुर्थसंध्यक्षरस्मृतरायां हृदृष्टान्तत्र संध्यक्षरवशे
नहायुदृशा एवाईभावो न चतुर्थे ऊह इति प्रदेशांतरेष्वाईभावकरणेन योनिगानापेक्षया विकारस्य
त्वादितिभावः निवर्त्येति। तथा च योनौ विद्यमानस्य एकारस्याभिव्यक्तार्थमाईभावेन कृतः किं
त्वेकारं निवर्त्य पूर्ववदाईभावः सामान्यगतयोगात्त इत्युत्तरयोरपि योनौ यत्क्रम एकारस्तत्क्रमप
ठितमक्षरमेकारव्यतिरिक्तमपि न निवर्त्य ईभावः कर्तव्यस्तस्मान्नोह इत्यर्थः ननु नपोनावे
कारनिवृत्तिः साम्नात्र गानस्यैवाक्षरस्याभिव्यक्तेः कर्मवाविधीत्युक्तत्वादित्यरुचेराह किंचे श्रीरामः
ति द्वाभ्यामतिस्वरूपेणापदार्थानामतिदेशा इति न त्वर्थेपक्षन्यायः नान्यथेति प्रत्युताहृदयार्थतास्यात्त २१
थाच दृष्टार्थता पापद्योन्यामिति शास्त्रस्य योनिवदुत्तरयोरक्षराभिव्यक्तिः कार्येत्युपकारातिदेशा

कृत्वमेवस्यार्थः अभ्युपेत्याप्याह यद्यपीति । सूत्रे सामानि देशो आई भावादिलक्षणो विकारो येषां
न्यायेषु सः स्यात्तस्य यद्योन्यामित्याद्यतिदेशशास्त्रबहुत्वात् ॥ स्तोभ ॥ साम्नामिव स्तोभानामग्र
क्षराभिव्यंजकत्वादनतिदेश इत्युत्थानात्संगतिः सिद्धांतयति भिन्नानामपीति सूत्रे स्तोभानामग्रं
न रेत्ति वृत्तिः मृगक्षरवदेके आचार्या मन्वते ॥ अधि ॥ विवर्णमिति ऋक्षाठ्ठहशायाम विद्यमानवर्णमि
त्यर्थः । तच्चाग्न आयाहीसाहावेकारस्यानेनिवेभ्यउं ग्नायाति गीयमाने ओकारादौ विकार इति व्या
ख्येऽअत उक्तं मृगाक्षरेभ्योधिकमिति तच्च हर्यश्वादिरित्यत्र श्वादिः श्वादिशिस्य भ्यासेति व्याप्तमनो
विवर्णमिति सूत्रे अधिकं च विवर्णं च यत् स स्तोभ इति जैमिनिर्मन्यते लोके देववहृत्तेन वाकं विज्ञा
वयतीव ऊं स्तोभकं कथितमित्याद्यौ वर्थाभिधानानुपयुक्ते च विपरीतशब्दभ्रं ते स्तोभव्यवहारात् ॥ ध
र्म ॥ निवेशादित्यनंतरं व्रीहीणां नीवारेऽपुरोडाशस्य चवरुणानि कृत्येरितिशेषः । सिद्धइतितथा
चनत्विद्ध्यर्थेमतदधिकरणावर्णनं भाष्यस्यमयुक्तमितिभावः । नीवारेतिनैवारश्चरुर्भवतीतिविहि
तानीवाराः षउहेमस्थिनेम ध्वाधायेन्हूतवेतिद्वादशाहगतेवाक्येमध्येशनेण जसूययतेने ऋ

नेचरुंनखावहननानामितिनखाः सोमिकचातुर्मास्यगतेपरिधौपस्पृंनिपुंजो नेतिपरिधिः एवंकृत्वोहेयप
मितीदापद्दंचतेषामित्यर्थः। ननुनीवाराणांचरुप्रकृतित्वेपिनव्रीहिस्थानापत्तिः चरोर्व्रीहिकार्यत्वा
भावेनतेषांव्रीहिकार्यकरत्वाभावात्तत्राह चरुरितिदेवतासंयोगेनचरोर्यागीयहविष्ट्वागमात्तत्प्र
कृतीनांनीवाराणांहविःप्रकृतिव्रीहिकार्यापन्नत्वमित्यर्थः अत्रचरोः पुरोडाशस्थानापत्तौप्रत्य
क्षवचनंप्रमाणं। चरौहविष्ट्वेनविधानात्सिद्धांतात्कथमिदमित्यत आह दंचेतिकिमित्याक्षेपेतुषविमो
चनार्थव्यापारएवनखावदलनमित्यर्थः। अतइतियद्यपिनखैर्विदलनकार्यारणसुलूखलादिका
र्यावहननार्थत्वेनप्रत्यक्षंतथाप्यवहननविदलनाभ्यांतुषविमोकेहष्ट्वानद्वारान्नमुलूखलमुस
लकार्यार्थानखाइत्यनुमानंनत्कार्यापत्तौमानंविस्पष्टमितिप्रत्यक्षवचनमेवात्रस्थानापत्तौप्र
माणमित्यर्थः। एवंचस्थानापत्तौप्रत्यक्षमनुमानंप्रत्यक्षवचनंप्रत्यक्षवचनावगतनिहत्यनु
मितश्रुतोऽभावेविधिश्चेतिपंचप्रमाणानीतिसिद्धं। सूत्रेद्रव्येनीवारादौगुणेमधुशनादौविका
रेचनखावपनादौआतिक्रमेपृथंक्त्यातिक्रम्यनियोजनसाधनतयाश्रुतेपरिध्यादौप्रतिषेधेगिरा

यदं प्रतिषिध्यविहिते इत्यपदादौ च चोदनानुबंधः चोद्यमानप्रोक्षणादिधर्मसंबंधश्च मेध्यार्थं कृत
त्वान्न कार्यस्य चनीवापदौ समवायात् ॥ तद्व ॥ आक्षेप इति अत एव संगतिः परिधाने नि
यान्न परिधौ यशुं नियुंजीतेति वचनमुपकारकत्वपरं न नादृष्टार्थपरमिति भावः । ननु कार्यार्थोध
र्मो स्तत्साधनता मात्रात्परिधौ स्युस्तत्राह प्रकृताविति अश्रूपेत्यवाहे नाहृयप्रीति अयमाहमि
तिसाधनत्वबाचकत्वतीयादिवशादृष्टार्थबाचकशब्दाभावात् किं तु समभीहितसाध न तावोधिविधि
समभिव्याहारलभ्यमित्यर्थः गमयतीति तथा च दृष्टं हृष्टसमुदाय एव यूपप्रज्ञानार्थ इत्यर्थः छेद
नादीनामिति सत्वचः शायानस्य परिधित्वान्न स्यात् स न नादेशादितो धात्वागेवछिन्ने तथा छेद
नादेरप्यलं न्नार्थत्वाच्च इत्यर्थः खलइति तत्रापिलुन्नार्थानामेव निवृत्तिर्नान्येषामिति हशमेवस्यत
इत्यर्थः ॥ सूत्रे परिधेराहवनीयपरिधानार्थत्वेन योमन्त्रेयंप्रथमीणां निवृत्तिः स्यात्तत्रेषां नियोजनांग
कृतत्वात् ॥ परा ॥ विनियोगाभावाहिति श्रुते च कं इध्वनिवकमिति समभीष्टव रोपितनत्र एणीतका
र्यैविधानं श्रुतस्तत्रोः प्रदेयधर्मत्वान्समभीच सहश्रयणीतिविहित सहश्रयणत्वबाधे काधार

त्वानुवाद इति षष्ठ उक्त त्वाहितिभावः । उक्तशंकयोत्थानात्संगतिः धर्मे प्रमेयो साधनत्वमात्रं
तेऽत्र वस्तु वा वचनिकमिति मत्वाऽसिद्धं नयति त्र्यस्त्वपीति स्वत्रे परार्थे प्रधानार्थे दृष्टिश्रुते च प्रणी
ताभिः सहार्थसामान्याभावात्प्रणीताकार्यकरत्वाभावात्प्रणीतासंस्कारस्याप्युत्पवनादिस्तद
र्थत्वात्कार्यार्थत्वात् ॥ एकार्याद्दिकार्यसाधनत्वप्रयुक्तो धर्मोऽस्तद्धार्थंतरबृहतोरेककार्यत्वा
दुभे संकर इत्युत्थानात्संगतिः । स्वराहीति स्वरत्वाद्यभिधायकऋगभिव्यंजकस्य स्वरः रथंतर
स्य स्वरः रथंतरस्य स्वरत्वादिना स्तोत्रसाधनत्वं चित्रत्वाद्यभिधायकऋगभिव्यंजकस्य बृहतस्त्वि
त्वत्वादिना स्तोत्रसाधनत्वमित्यर्थः । कारकेति हविः प्रकृतित्वादिरूपभेदेन व्रीह्यादिकारकभेदा
दित्यर्थः । स्वरस्वराभिव्यक्तिसाधनत्वे शास्त्रस्य तात्पर्ये स्वरत्वादिप्रकारस्त्वार्थिकोऽतः शास्त्र
तात्पर्यविषयसाधनरूपे रोव धर्मसंबंधात्संकरः । व्रीहीणां तु हविः प्रकृतित्वे शास्त्रतात्पर्याद्विष श्रीराम:
यमित्याह नैवमिति कारकेति साधनेत्यर्थः । पवेष्वपीति कृष्टिममस्तरणान्तेऽनुलकत्वाद्यार्थिकद्वारभेदे २३
पि हविः प्रकृतित्वस्य साधारणत्वादिति भावः । कचिदिति धर्मविधाविसर्थः । स्वरूपमपीत्यपशब्देन

साधनत्वविशिष्टस्वरूपद्योतनार्हैच्यर्थ्यशंकानिरासः स्वरूपविवक्षायां क एव रथंतरादेः स्व
रूपाभावान्मीलनादयः स्युरित्यरुच्याह किं चेति । नन्विति न चैवमप्युत्तरत्रिगत बहुत्वं संख्या
पृष्ठभेदात्साम्नोः पृथक् पृथक् साधनत्वाव कार्यमिति शंकां तदूहेपि स्तोत्रांतराणां साम्नां नराव
रूढत्वेन माहेंद्रस्तोत्र एव बृहद्रथंतरविध्यावश्यकत्वेनैककार्यत्वानपायादिति भावः तस्मादिति स्तो
त्रानुवादेन सामविध्यसंभवादित्यर्थः ननु रथंतरपृष्ठमित्यभेदावगमादन्यदिदं पृष्ठं रथंतरेण सा
ध्यमित्याद्युक्तं तत्राह पृष्ठशब्दस्य त्रिवामदेवेषु माहेंद्रादिस्तुति कीर्तनात् सप्तदशानिष्टयानीति
सप्तदशत्वरूपगुणविधानाच्चेत्यर्थः । सप्तदशत्वस्य स्तोत्रीयापरिच्छेदद्वारा स्तोत्रांगत्वावश्यक
त्वादिति भावः । गुणागमे शितिबहुवचनेन पृष्ठैः स्तुवत इत्याद्यर्थवादवाक्यसंग्रहः तत्र स्तुति सामाना
धिकरण्यात् तेनैकार्थ्यमिति येन सत्यपि स्तोत्रभेदे साधनताप्रयुक्तो धर्मः संकीर्येरन्निति भावः नहि
प्रयाजादिवत्समुच्चयः स्यात्तत्राह नानेति वचनेनात्र रथंतरं बृहद्वा पृष्ठं कार्यमिति मीमांसक प्र
वादः सत्येव रथंतरबृहतोरेकार्थत्वाद्धर्माणां संकरः स्यात् ॥ अथ ॥ क एव इति क एव रथंतरादेः साम

शा॰दी॰२ साधनंकेवलंपृष्ठंभवतीतिप्रकृतितः प्राप्तपृष्ठस्तुतौकएवरथंतरात्व्यसामविधिप्राप्तइत्यर्थः। स्थानेनि
२४ स्तुतिसाधनत्वादितिभावः प्रकृतावितिनसमुच्चयइत्युत्थानासंगतिः प्रकृतौपृष्ठस्तुतेसैकांगी
कारपक्षेपिकएवरथंतरेधर्मेविकल्पसिद्धौकिमुवक्तव्यंतत्रतत्रेद्वपक्षेसेत्समित्रेत्यप्रथमंस्तुतेत्येक
24 पक्षेविकल्पमुपपादयतिअपीतिसूत्रेअप्राकृतेकएवरथंतरेतद्विकारत्वाद्बृहद्रथंतरोभयस्था
नापन्नत्वादुभयधर्मास्तुर्विरुद्धास्तुपधर्मास्तेविरोधात्समुच्चयासंभवेनव्यवतिष्ठेरन्नवार्तिकप
क्षेवैश्यस्तोमस्यज्योतिष्टोमविकारत्वाद्यथाप्रकृतिस्तुतिद्वयविकल्पेतद्धर्माअपिविकल्पेरन्
बृहत्युच्चैर्गेयंरथंतरेनोच्चैरित्याद्यादिधर्माणांविरोधाच्च॥३भ॥ संसवइतिसंसवोनामसोमयागवि
शेषः पूर्वत्रविकल्पेपीहसमुच्चयइत्युत्थानासंगतिः कार्यंपृष्ठस्तोत्ररूपंविधीयतइतिननुविधीयतेपृष्ठा
नुवादिपदाभावादितिभावः पृष्ठयोरितिउभेइत्यनेनसामसाध्यपृष्ठयोरेवग्रहणादितिभावः अप्राकृते श्रीरामः
तिसमुच्चयेरथंतरस्यबृहत्कार्याकरत्वापत्तेर्बृहतश्चरथंतरकार्यापत्तेरप्राकृतकार्यत्वस्यादित्यर्थः २४
सूत्रेउभयसाम्निसंसवादावपिएवंकएवरथंतरादिद्वउभयस्येकार्थापत्तेरुभयधर्मास्युः॥पा३॥संग

त्तिमग्निमाधिकरणेऽयं प्रकार एव वक्ष्यति तदर्थमिति आरादुपकारकत्वं प्रयाजादिवदतिदेशादितरथा
द्वाराभावादनतिदेश इति फलफलिभावः। न स्यादिति कालस्य मंत्रस्मार्यत्वेन संस्कारो वाच्यः। पशुपुरोडा
शदेवतादिवत् स चेह न संभवति पार्वणहोमयोः प्रयोगमध्यवर्तित्वात् कालस्य चोपक्रम एव प्रतीतेः स्मरणी
यस्य मध्ये स्मरणावृत्त्यर्थ्यादित्यर्थः पर्वेष्टिरित्यादिकर्मण्यपि प्रयोगं सूचयति मन्यन इति दानकर्म
त्वादिति शाखिकैर्योगदानयोरेकतया व्यवहाराद्यागवाचकत्वादित्यर्थः। ननु कर्मण एव संस्कारेण
विकृतिकर्मणि मा विलोपी स्यादिति दिश्यतां तत्राह नैषामिति सूत्रे पार्वणहोमयोर्विकृतिषु प्रवृत्तिः पर्व
शब्दस्य कर्मसमुदायार्थत्वेन न स्यात्तदभिज्या॥ ३८॥ पूर्वोक्तार्थ एव विशेषविचारात्तत्संगतिः संस्का
र्येति लिंगात्प्रकरणस्य बाधः न चात्यंतबाधः उभयत्राप्येकैकहोमसत्वात् पर्वस्येति कालाभीज्या
पक्षे उभयोः पर्वणोः कर्मभोहोमो स्यातामारादुपकारकत्वेन लिंगेन विशेषासिद्धेरिति पूर्वाधिकरणपू
र्वपक्षप्रयोजनपरमेकं स्त्रमपरं च यस्य समुदायस्य यत्र संस्कार्यत्वं संभवस्तद्विषयो होमस्तत्रेति
सिद्धांतप्रयोजनपरमित्यर्थः। ३८ हेतिकरणं रथंतरादाविति शेषः। अर्वांतरेति त्र्यहस्वरूपं संस्कारः

शा॰ दी॰ ९ पंचेति विचारितमित्यर्थः ॥ ध्रुपा ॥ ननु समिदन्वाधानादिकर्मसंबंधिनां समिदादीनां द्रव्यदेवतासंबं
२५ धावगमिनयागभावेः प्रयाजेष्वीत्यादिवद्द्रव्यविधया संस्कार्यत्वाभावे पि स्विष्टकृदादाविव द्रव्य
विधया संस्कार्यमस्त्वत आह देवतात्वेनेति समिधोग्न आज्यस्य वियंत्विति त्याहिमंत्रप्रकाश्याग्नि
25 देवतासमानाधिकरणतया देवतात्वेनैव संस्कार्यत्वम् चितपशुपुरोडाशादाविव न तु स्विष्टकृदादा
विवद्द्रव्यविधयेति भावः ॥ पूर्ववदिति संगतिरप्युक्ता उपचर्येति वा सांतरया मानुवादित्वादुपचारो न दो
ष इति भावः ॥ केवलाः संयोगरहिताः न चेति नवत्वे द्रव्यसमर्पकतया विधिसंबंधित्वाद्विधावुपचा
रः स्यादित्यर्थः ॥ ॥ इति श्री वेपकनाथकृतौ शास्त्रदीपिकाप्रकाशे नवमाध्याये द्वितीयः पादः २
॥ प्रकृ ॥ ॥ प्रथमे पादे मंत्रोहमध्य एवावांतरसंगतिलोभेन साम्नो होपो द्युतत्प्रसक्ता सामोहो द्युते सा
मोहविचारं तत्संगतं च संस्कारोहविचारं समाप्येदानीं सूक्तवमंत्रोहे प्रस्तूयते इत्याने तयेमे स्वाह मंत्रा श्री रामः
णामिति त्रीहीणामिति चरोः पाच्यो प्रतिष्ठानाभावात्तदर्थस्यास्य मंत्रस्यनेवा शेषप्रसक्ते रुदाहरणा
द्विगयमिति ध्येयं अवश्यमिति आग्नेयमिति विधावग्निपदस्यैव श्रुतत्वादिति भावः बर्हिर्मिनीहसाग्नि २५

पदेऽपि बोध्यं सत्त्वे प्रकृतौ तयोः सन्निपत्य सहयुक्तत्वान्मंत्राः अन्यस्तत्वादयुक्तैरेव मंत्रैरग्नीनामभिधा
नेहि तत्रोदिकारत्वादुक्तस्यामपि — तंत्रो — विकृतावपि तथैवाग्निष्वयुक्तैरेवाभिधानं कर्तव्यमिति प्रा
प्ते पक्षे वशाद्धेन नियमः च प्टेनैतदेवं अर्थं प्रकाशयत्वात् वैकृते थैय यामद्वानमंत्रप्रकाशकत्वात्संभवात् ॥
जाति ॥ पूर्वे गणितिहृदतरस्मरत्यर्थेन याहृष्टार्थत्वमेतिभावः सत्त्वे जातिशब्दो धर्मश्च शब्दो द्वयोर्नैमित्ति
को गुणशब्दो गुणोच्चयथा स्यान मूढि न व्यालो कि ॥ यदिमंत्राणाम् ऊहस्याद्घोके मित्यादि वाक्ये यदि हो
एतो ते वायवइतिब्रूयाद्यदि बहून्नेतेते वायवइति ब्रूयादिति विधिर्ने स्यात् द्व्योर्बहुषु चोहादेव प्राप्तेरिति पूर्व
पक्षलिंगदर्शनत्वेनप्रसक्तमित्यर्थः जातिर्नैमित्तिकमिति पूर्वाधिकरणस्यात्तरागामिणीत्वेन प्रवृ
त्यात त्पूर्वोधिकरणमेव पूर्वाधिकरणमित्यनेनोक्तं सत्त्वे लौकिके उपस्पर्शने अयं विधिः स्यात् दोषसंयो
गात् कथं दोषसंयोगः हि यस्मादप्रवृत्तेः प्रतिषिद्धे स्पर्शने नैनानि मित्तेन विधीयते मंत्रः स्पृष्टेन कृतो
प्रतिषेधस्याभागित्वात्तस्मादोषनिर्घातार्थत्वाल्लौकिकएव स्यात् ॥ अन्या ॥ प्रधानभूत ग्रहस्य हवि
तानंतरं गुणभूतवचनो हविततानांसंगतिः उभाविति एकवचनेनान ऊहेन बहुवचनेनाननूहेनेत्यर्थः

शा॰दी॰९ नचेति विकारस्यानार्षत्वाद्दर्शनाद्विकारेणैवाभिधानयुक्तमिति भावः निर्देशेति न केवलाद्वहूक्तिः
२६ प्रयोक्तव्येति न्यायात्स्वकृतिप्रयोगमात्रार्थत्वादित्यर्थः समग्रेति संख्याविशिष्टपाशेत्यर्थः विक
26 ल्पेति पाशमात्रेत्यर्थः अविवक्षितेति निर्देशमात्रार्थत्वादिः द्वयोरपीति प्रकृतौ बहुवचनान्तस्याप्य
वयवबहुत्वमवयविन्युपचर्य प्रयोगाद्विकृतावपि तथैव प्रयोगसंभवेनान्यहेन प्रवृत्तिरेकवचनान्तस्यो
हेन प्रवृत्तिरित्यर्थः ननु बहुवचनस्य प्रकृतावेकस्मिन्निव विकृतौ द्वयोरभिसाधुत्वे किं न स्यात्त
त्रोह प्रकृताविति छन्दस्येकस्मिन्नपि प्रयोगबलाद्दृष्टानुविधिः छन्दसीति व्यत्ययानुशासनेन साधु
त्वं संभवति द्वयोर्बहुवचनस्य प्रयोगादर्शनान्न व्यत्ययाश्रयणे प्रमाणमस्तीत्यर्थः सूत्रेऽत्र न्या
यः अन्याय्यनिगदो बहुवचनान्तः अविकारेण प्रयोज्यः एकस्मिन्बहुवचनस्य प्रतिघातदर्शना
त् द्वयोस्त्वेकस्माद्विशेषणाभावात् ॥ विश्वा ॥ बहुवचनान्तमंत्रस्यापि प्रकृतिनिर्देशस्य पूर्वोक्तरेहनि श्री॰एम॰
वोहकस्याविज्ञानात्संगतिः व्यवहारेति । अनुष्ठानेत्यर्थः सूत्रे अनुष्ठेयपाशस्यैकत्वान्मंत्रस्य ब २६
हुत्वाभिधायित्वाच्च प्रतिपन्नो विरोधस्तन्निर्मत्र उत्कृष्टव्यः किं त्वेकवचनान्तेन सहास्य विकल्पः

स्यादुभयोरपि पाशाविशिष्टैकर्मप्रतिपादकत्वेन समत्वात् गणोतु बहुवचनेऽन्याय्यलकल्पनातेन
श्चैकदेशबहुवचनाश्रयेणानोत्कर्षः ।। त्र्यपू ।। एकपत्नीकप्रयोगे वचनस्य समवेतार्थतया पाशबहु
त्ववत्त्वमर्थात्र समवेतत्वाभावादाह इति सर्वदैव प्रयोगोऽस्यानात्मगतिः अन्याय्येति शब्दस्यार्थे विव
क्षया प्रयोगोऽन्याय्यस्तद्दर्शनेऽत्यर्थः निर्देशमात्रार्थमह स्वार्थवेति यावत् ।। यदीति ।। यदि द्विवेकपत्नी
कप्रयोगः प्रकृतिः द्विपत्नीकादप्रयोगोऽनादिकृतो स्यात्तामित्यपि द्रष्टव्यं उत्तरथा ऊह्येनेत्स्वहा
पाशानां प्रयोगात्तत्सर्वाभिप्रायत्वे फलितमाह द्वयोरिति तथा चाविवक्षितसंख्याकत्वं सिध्यतीति
भावः। नहि किमर्थमेकवचनेऽप्रयोगसाधुत्वार्थमित्याह निर्देशेति वचनान्तरेणापि साधुत्वं स्या
दत आह अर्हस्वार्थमिति एकत्वमिति जात्यभिप्रायेणेति शेषः। प्रातिपदिकेति प्रातिपदिकस्याव
त्यंपाशाधिकरणप्रतिपादितमिति भावः संख्याया अत्र समर्थत्वादित्यन्वयः नत्र हेतुरविवक्षि
तत्वेनेति अत्र विवक्षाचपाशबहुत्ववदेवेति ध्येयं सत्रेऽत्रापूर्वेप्रकृतोपत्नीमित्यस्याविकारः अत्र प्र
देशात्सामान विध्येनाननिर्देशात्प्रतीयत ।। विकृ ।। प्रयुक्तमिति तथा च प्रयोगबलात्सकृता

शा·टी·९ वेव साधुत्वं न तु विकृतानामित्यर्थः अत एव पूर्वं वैषम्ये णोत्थानात्संगतिः छांदसत्वादिति एकवचनं स्यादु
२७ यो र्वेदेषु चाम्नानबलात्प्रकृतौ कल्प्यमानं छांदसत्वेन साधुत्वमविशेषाद्विकृतिसाधारण्येनैव क
ल्प्यत इति भावः पाशेनाहि कथं साधुत्वापर्मूहस्तत्राह पाशान्विति द्वयोर्वेदेवचनस्य छांदसप्रयोगा
दर्शनात्तत्र साधुत्वार्थमूह इत्यर्थः स्त्रेत्रे विकृतावप्यविकारः न द्वचनास्तु त्रीमात्रवचनेनैकवचन
स्याविवक्षितत्वात्॥ अधि॥ आग्नेयमग्निष्टोम आलभते ऐंद्राग्नमुक्थ्ये द्वितीयमैंद्रं वृष्णिं षोडशिनि
तृतीयं सारस्वतीं मेषीं चतुर्थीमतिरात्र इति श्रुतेषु सवनीयपशुषु संस्थानां पशूनां च सामानवि
व्यपदेशात् आग्नेयस्य गुणेषु गणे एकवचनान्तशाकृतः हानहपूर्वपक्ष सिद्धांतः पत्नीरण्वदेवद्
ष्टव्यः तर्हि किमर्थमिदमधिकरणं तत्राह तृतीय इति पूर्वपक्षमिति अधिकरणद्वयं इति शेषः
एवं चेदमधिकरणद्वयं पूर्वपक्षयोः समुच्चित्यप्रयोजनकथनमिति ध्येयं उक्थ्ये ति अनेकपशुके
ष्वुक्थ्यादिषु यः सवनीयपशुगणस्तत्रेत्यर्थः नोहितव्य इति किं त्वविकारेण प्रयोक्तव्य इत्यर्थः वि श्रीरामः
कारेति उक्थ्यादिसंस्थानामग्निष्टोमविकारत्वं सवनीयानां चाग्नीषोमीयविकारत्वमिति पक्ष २७

इत्यर्थः ननु मेघ्यामिव निवृत्ते खगुक्तत्वात्कथमविकारेणाप्रवृत्तिरिति शंकते नन्विति अपि चेति
जातिव्यक्त्योरास्तादात्म्याद्व्यक्तिगतबहुत्वेन बहुवचनस्य जात्यैकत्वेन चैकवचनस्य संभवादिति भा
वः॥ अतिः॥ प्रास्माद्वित्येकवचनस्याविवक्षितत्वादन्वहे पित्रोर्हि शब्दस्य विवक्षितार्थत्वाद्वहरः त्स्युत्या
नात्संगतिः सत्रेष्वतिनिधौ चाविकारमाश्रित्यैवं मंत्रः प्रयोक्तव्य इत्यर्थः संसर्ग॥ नीवारगता वयवेषु
व्रीहिशब्दस्येव एकवचनांतत्व श्रुतः पदस्यानेकपशुषु सामर्थ्याभावाद्वहरः त्स्युत्यानात्संगतिः सं
सर्गिणाः संयुक्तत्वेऽएकीभवनशीलाः यथाज्यान्तैलतेजः प्रभृतयः अधिष्ठानेति गोलके सर्थः अ
स्येति उदीचीनाः असम्पद्दोनिधनादिति सन्निहितत्वादिति भावः। सत्रेसंसर्गेषु चानूहः अर्थ स्पते
जः प्रभृतेरस्थितपरिमाणत्वान्नियतपरिमाणत्वाभावात्॥ अत्र परिमाण शब्दः संख्यापरः तथा च
संख्यानियमः संसर्गिषु नास्तीति निर्गलानां वहूनामप्येकत्व संभवादनूहः॥ एके॥ संसर्गिषि वावि
कारइत्स्युस्थितेः संगतिः येनेति येन शब्देनयस्यार्थस्येत्यर्थः अन्येतिनेनशब्देनार्थान्तरमपीत्यर्थः
आर्षेति ऋषिवेदे पठितस्य शब्दस्य यथोदकसतदनुग्रहायेत्यर्थः सत्रे एकत्वेत्वभ्यासेनाभिधानं

शा॰टी॰१ स्यादेकसंयोगाद्भ्यासंविनासर्वविषयत्वासंभवात् ॥ मेध ॥ एकधेत्यादिभिन्नसमवेतार्थत्वाभावा
२८ दन्नहेतुत्वस्यानात्संगतिः मेधंप्रसंमेध्यार्क्कत्विजः उरोयत्तस्यहारंचात्वालोत्करमध्यदेशमुपनय
तेत्यर्थः उभयेपीति मेधपतित्वेनरूपेणत्रयाणामप्यभिधेयत्वसंभवादितिभावः एक इति प्रत्यभिज्ञा
नादेरितिभावः यजमानेतियजमानपरत्वेपशोर्यजमानार्थतयासिद्धस्यतादर्थ्येनाशासनासंभवा
न्मेधपतयेयोमेधः सिद्धस्तमाशासानाइतिसंबंधात्स्वत्वापरत्वेतुतादर्थ्येनाशासनसंभवान्मे
धंमेधपतिभ्यामाशासानाइतिसंबंधइतिवचनव्यक्तिभेदइत्यर्थः द्विवचनेत्विति नचाधिष्ठानद्वारा
कारकस्यत्वप्रयोगात् तस्त्रैमेधपतित्वंस्वामिनोदेवतायाश्चत्रयाणामपिमेधसमवायात्सर्वत्र
चाधिपस्यपतिशब्दप्रयोगात्त्रिषुचैकवचनस्यान्याय्यत्वान्निगदत्वात्सर्वासुविकृतिषुविकारः ॥ निय ॥
असंदिग्धइतिद्विवचनस्याधिष्ठानाभिप्रायत्वादधिष्ठानबहुत्वेद्विवन्निगदोहस्यपूर्वोत्तरपक्षयोरसं श्रीरामः
देहात्सनविचार्यइत्यर्थः एकवन्निगदोपूर्वपक्षइतिपूर्वपक्षकोटिस्तत्रहृष्टान्तस्तद्वदितिद्विवन्निगदादि २८
त्यर्थः यद्यहस्माहैकयनिवर्ततइतिभाष्यंतत्राह एकेति ननुस्वरूपेणानिहत्याभिप्रायंभाष्यमित्यर्थः सि

ड्वांतयति देवतेति नन्वेकवचनं चेद्देवतासंख्यावधारणं हितव्यमिति प्रयोजनमपि द्वैवत्रैवो क्रमित्यस्य
रसाद्दाहयद्देतिसूत्रे एकवचननिर्गदस्य बहुदेवताधिष्ठानके नियमो निवृत्तिः एकवचनोंतत्वाभिवृत्तिरि
तियावत्तत्तस्मात् ह्रिकारस्यात् ॥ अर्थो ॥ पूर्वत्र बहूनां देवतानामिह तु देवतानां बहुत्वमिति विशेषमप्युमाह देव
तात्मन इति सूत्रे अर्थांतरे एकादशिनादौ देवताकारभेदाद्धिकारस्य प्रसेकमेवतद्धिनादिसमवात्म
त्येकमेव देवता स्यात् ॥ ॥ इति श्रीवोपकनाथकृतौ ष्टाक्षरदीपिकाप्रकाशे नवमाध्याये तृतीयः पा
दः ॥३॥ ॥ षड्डुं ॥ ॥ संक्षिप्यधावांतरकार्यकारणं मंत्राणां महोस्मिन्यादेविचार्यत इति पादभेदः
नाद्दशमूत्रोह अमंत्रगतपदावांतरकार्यनिरूपणापूर्वकं निरूपणीयत्वेन बिलंबितोपस्थितिकइ
त्यानंतर्यं च ज्योतिष्टमत्यादिविचारस्तु प्रासंगिक इति बोध्यं ॥ तत्र वेति अधिगुप्रैषएवत्वार्थः वंक्रयः पा
र्श्वीस्थीनि उत षड्विंशतीति अत्र स्येति पदगतमेकवचनं चेत्यपिद्द ब्द्वांत्र स्येति पदमितिम्मस्येति पदमा
त्रमित्यर्थः तत्प्रधानमिति वंक्रि प्राधान्यासिद्धांते -- स्यवचनेन षड्डुंशतिशदस्य निवृत्तिः स्यात्तता
वरंप्राकृतस्यैव प्रयोगार्थसंबंधप्राधान्यस्वीकारः तद्धलागतस्त्वभ्यासलद्देणाई षद्धिकारान्नदो

शा॰टी॰९
२९
29

षइतिभावः ततइतिसंबंधस्यपृथक्त्वपदेनानुपात्तत्वया संबंधिशब्दयोरेवाभ्यासेनप्रकाशनीयत्वा
दितिभावः अयमेवेतिद्वितीयपक्षे अदृष्टार्थत्वात्संख्याप्राधान्यमितितृतीयपक्षे एकवचनस्याविभक्तौ
निवृत्तिप्रसंगात्तत्पक्षप्राधान्यमितिचतुर्थपक्षे चषष्ठीविरोधादितिभावः अकरणेति संहृपनाख्याक्षा
लिकस्यास्यवत्रुद्धरणाकरणत्वासंभवादितिभावः अवदानेति अवदानयोरवदेययोः पार्श्वयोरन्तूनो
द्धरणायेत्यर्थः संख्येति संख्याप्राधान्यएवसाकल्यप्रतिपादनंभवतिनान्यथेतिभावः अस्यपदमितिष
ड्विंशतिरस्यास्यवंक्रय इत्यभ्यासेप्रतिपशुषड्विंशतिसंख्यासंबंध्यत इति भावः वंक्रार्थतयाइयत्ताप्र
काशनेदृष्टार्थत्वलभ्यत इत्याशयेनपार्श्वसाकल्यसिद्धयइत्येतद्याचष्टे अन्तनयोरितिवक्ष्यामइतिद
शमइतिशेषः नाइति अनुष्ठापयत्नेनउच्चावयताडुद्धरेत्यर्थः सूत्रेपशुगणेषड्विंशतिशब्दाभ्यासेनप्र
युज्येतप्रकृतावेकस्यपशोः षड्विंशतिसंख्यावंक्राभिधानादिहचषड्विंशतिसंख्यारूपगुणस्यप्रति
पशुविभक्तत्वात्तत्रयुद्दिश्यथाप्रकृतसेवाविकारेणाप्रयोगस्तदागणेवंक्रीणांकात्स्न्र्येनाभिधानंनस्या श्री एमः
न्नचसमस्यवचनंसंभवतिप्राकृतस्यसर्वबाधोनास्तंतविकारापत्तेः समानेप्येकस्यपशोः सर्वाभिर्व २९

क्रिभिः संयोगाभावाच्च ॥ अस्त्र्य ॥ प्राप्नोतीति वैशेषिकमेव कर्तव्यमुत प्राकृतमपीति करिष्यमाणविचा
रस्य वैशेषिकप्राप्त्यधीनत्वात्तत्प्राप्तिमत्त्वेनेत्यर्थः अधिकरणांतरत्वेनेति गाशाष्टोनास्यायां
आनुमानिकविधेः प्रत्यक्षनिषेधस्य च तुल्यबलत्वदशायामेव प्रमाणत्वात् षड्विंशतिरित्येवेत्येव
कारोपहतविधिशक्तिकतया विधायकत्वाभावस्याग्रिमाधिकरणोपपादने नगिरापदद्वैषम्य
स्याभिहेष्टपूर्वपक्षमंगाद्यादिति ध्येयं षड्विंशतिरित्यस्याः पशुगणांतरे समस्यवचने पशुमेधे नस
मासहेत्वाग्रिमाधिकरणपूर्वपक्षस्य सर्वाधिकरणसंगतेः स्यान्नान्तस्य पाक्षिकाधिगुणेषु वचनवि
षयत्वात्तत्साक्षिकविचाररूपस्यास्य वार्तिककारीयाधिकरणांतरस्य तदुपोद्घाततया संगतिर्बो
ध्यानित्येव दिति स्वार्थेवति: निसंसर्गेऽर्थे सप्तमी: एवकारेतिषड्विंशतिरित्येव ब्रूयादित्यत्र षड्विंशति
रित्येतदेवकारस्य विशेषणांततश्चैवकारः स्वयंप्रधानीभवन् षड्विंशतिपदमात्मसात्कुर्वंस्तस्य विधि
संबंधं विहंतीत्यर्थः सत्रे अश्वस्य चतुस्त्रिंशाहेत्यय: संति तस्मात्तत्प्रकाशनसमर्थं वैशेषिकमेवक
र्तव्यं वचनात्मकरणो वैशेषिकाम्नानात् ॥ तत्र ॥ ९३ । श्रीतिरितितत्परगो मृगयोर्हृद्यं चाशादश्वस्य च

तुस्त्रिंशादित्येवं षडशीतित्वादिति भावः अयथार्थमिति अस्य मेवं धि चतुस्त्रिंशद्धं क्रियानिपादनाशक्तेरि
त्येवं शेषिकग्राहकनयोर्विकल्प इत्युक्तं वैशेषिकस्यैव नियतत्वादित्युत्थिते: संगतिः पठितायामिति
चतुस्त्रिंशद्धाजिन इत्यस्यामित्यर्थः तस्मादिति समस्तकं क्रुप्रतिषेधाभावान्नित्यवत्सा उलब्धो विधिरि
ति चोदकबाधेन षड्विंशद्धाजिनोदेवबंधो रित्येवं रूपेण पठितेव नित्यं प्रयोक्तव्य इत्यर्थः एवं चैत्रं न्या
येन वाचनिकेनैव षड्विंशतिपदेन चतुस्त्रिंशतोपि लक्षणया अभिधानमिति भावः एवकारेति चतुस्त्रिं
शत्पदमात्रनिषेधे षड्विंशतिपदस्यानुवादेन संभवत्यप्राप्तत्वान्नषड्विंशतिपदविधौ तु चतुस्त्रिंश
न्निषेधानुवादो युज्यते न च तद्विधिरपि संभवत्येवकारोपबद्धत्वादतो न पदविषयाविमौ शब्दौ किं तु अ
ग्विषयावेवेत्यर्थः चोदकादिति चोदकप्राप्तमाधिगुवचनमेव षड्विंशतिरिति ब्रूयादित्यनेनानूद्य
त इत्यर्थः ननु चतुस्त्रिंशन्निषेधवचोहनायां यदि षड्विंशतिपदस्याप्राप्त्याऽनुवादासंभवस्तर्हि तद श्री एमः
पि विधीयतां तत्राह न चतुरति एकवाक्यत्वान्नोभय विधिसंभव इत्यर्थः विधीयतइति न चतुस्त्रिंशादि ३०
ति ब्रूयादिति वाक्येनेति शेषः तद्धि हिताच षड्विंशतिरित्येव ब्रूयादित्यनेनानूद्यत इत्यर्थः न हि हयथा

श्रुतार्थो ग्राह्यः न च तु स्त्रिंशादित्यस्यैव प्रथमोच्चारितत्वेन विधायकत्वौचित्यात् ऐरमिति एवकाराद्यभा
वादिति भावः आकृते पौतिपदादाकृतेन तदापि तत्पर गोमृगयोर्द्विपंचाशादनयोर्वैकय इति सांमासिकं
वचनं कर्तव्यमष्टत्वेतु षड्विंशतिरस्या वैकल्पे स्येव वक्तव्ये न तु षडशीतिरेषामिति त्रयाणां समस्य वृद्ध
ममित्यर्थः किं त्विति षड्विंशतिपदेनैनेकदेशेन तत्पदयुक्तमधिगुवचनमेव लक्ष्यत इति भावः सूत्रे
वैशेषिकं वचनं प्रतिषिध्य प्रकृतिः आकृतमधिगुवचनमपि नियुज्यते सा च प्रकृतिर्नियुज्यमाना
स्वपक्षे तु स्त्रिंशादाद्यलाहारयतीति पक्ष एवं वैशेषिकं न नित्यं ॥ वृत्तिः ॥ षड्विंशतिशब्दे समस्य व
चनात्मकोहेत्युरूकशब्देनोह इति संगतिः वनिष्ठुमिति वनिष्ठुर्नाम वपासन्निहितो वपासदृशो व
यवविशेषः तमारात्विष्टनल्लवतेमाकृतन्नत्रोरूकबुद्धिं कुर्वाणाः इत्यर्थः प्रतिषिध्यत इति प्रतिषेधो
मंत्रेण प्रकाश्य इत्यर्थः मंत्रवर्णादेव प्रतिषेधकविधिकल्पनात् अस्य मंत्रप्रकाश्यसंभव इति भावः किं
वनिष्ठलवनं निषेधः। प्रकाश्यः किंवा सादृश्यबुद्धिनिषेधो नाद्य इत्याह नतावदिति वनिष्ठुमद्युद्धि
भेदोजाघनीमित्युद्धरतीति प्रत्यक्षविधिविरोधादिति भावः न द्वितीय इत्याह सादृश्येतिदर्शिते

त्रिउरूशब्दो विसर्गलोपवचनः कम्राह्रोमेदोवाचकः कासशब्दैकदेशतया कासशब्दलक्षणया उदरामेदः अ
तिपादक इति वपायामवयवव्युत्पन्नाभीष्टे दर्शिते त्यर्थः ऊह इति उरूकमित्यस्य पदद्वयस्य पक्षे वपा
च्छुत्वे उरूणीके इति एकपदत्वे उरूके इत्यूहः एवं बहुत्वेप्यूह्यमित्यर्थः सर्वे उरूकशब्देन वपाभिधानं
स्यादुक्तनिष्ठसन्निधानादुक्तनिष्ठसन्निधानकृतव्यामोहनिवर्तनेन दृष्टार्थत्वात् ॥ प्रश ॥ उरू ॥ कश इ
स्य पक्षेऽभिधाने प्रयोजनाभावान्प्रयोजनाय वपाभिधायकत्ववत्प्रशंसाशब्दस्याभिप्रशंसावाचक
त्वे प्रयोजनाभावात्स्याभिधायकत्वमिति संगतिः शासु शब्दस्य शासशब्दसमानार्थकत्वमाह म
न्यत इति स्वधितेनाभिस्वधितिनापशुं विशास्तीति विधानात् इतिभावः मांत्रवर्णिके नित्रक्रमस्यापि
करणत्वस्य तत्रमंत्रविनियोगस्य च कल्प्यत्वादिति गौरवमित्यर्थः ऊह इति प्रशस्तानितीत्यादिः सू
त्रे प्रशासा प्रशसा शब्देन ॥ श्येन ॥ प्रशासा शब्दस्य प्रशंसा द्वारा साकल्यपरत्वेपि श्येनादिशब्दानां श्री रामः
सादृश्यमात्रपरत्वोपपत्तेः नै साकल्यपरत्वमिति संगतिः एवमिति शलादोषणी त्यत्र दोषणीभु ३१
जौ शला शल्यकलोमसदृशौ शलाकाकारौ स्वेकवर्णीकरवीरपत्रसदृशौ शुकपत्रसदृशौ गाइत्य

२ तेषु पि सादृश्यमुखेनो वैकल्प्यमेवप्रतिपिपादयिषितमित्यर्थः सन्नेश्येनादिष्वाकृतिवचनं चतुचर
णावयवसंस्थानाभिधानं स्यात्प्रसिद्धश्येनादेः सन्निधाने तदाकृतेरेव कटतिप्रतीतेः॥ प्रासं॥ उ
द्वासिध्यर्थमधिराग्नेषगतपदानामवांतरकार्यं प्रस्कृतमिति तत्प्रसंगाद्दिष्टेः किमपूर्वकार्यमुताग्नि
संस्कार इति निरूपणात्संगतिः उद्धृत इति गार्हपत्यादुद्धृत्य प्रणीत इत्यर्थः उद्वाये हितिन श्येदि
त्यर्थः तदर्थमितितदर्थो किमारादुपकारकमुत समवायिकमितितदर्थंचाकिमग्निविशिष्टोद्वा
ननिमित्तकउतोद्वानव्याप्ताग्निनिमित्तकमितिसंशयइत्यर्थः अग्नेरुत्सादकत्वमितिसम
वायिकत्वोपपादकं उद्वानपरीतेतिनाशव्याप्तेत्यर्थः अस्मेतिपदमुत्सेत्यर्थः वाक्येनेतिपदंतेनेरा
णत्वात्तदेकवाक्यतयेत्यर्थः उद्वानस्यनिमित्तत्वेऽप्यारादुपकारकत्वमुपपादयति यदाहीति नन्न
द्वानस्याग्निहोत्राङ्गतयाग्निसंस्कार्यत्वेऽपि तद्विशेषणस्याग्नेरंगत्वात्संस्कार्यत्वं किंन स्यात्त
त्राह अग्नेरिति उद्वाने विशेषणत्वाद्धानेर्नसंस्कारान्वययोग्यतेति संस्कारत्वासंभवादारादुपका
रकत्वमेवेत्यर्थः नन्वेवमपिभिन्नेजुहोतीत्यादौ प्रकरणबलात्प्रकृतस्यैव निमित्तत्वपर्यवसा

शा॰ दी॰ ९ नं न तु निमित्तत्वावगमदशायामेव प्रकृतत्वेन विशेषणमिति हेतुदशायामपि तु नाग्न्युद्धानेऽपि क्रियमाणा
३२ याइष्टेरग्निहोत्रे आराद्उपकारकत्वांगीकारान्न फलकल्पनेति निमित्तनाहशायामेव प्रकरणबला
दग्निहोत्रार्थत्वेन विशेषणं वाच्यं न च तत्संभवति निमित्तस्योद्देश्यतया वाक्यभेदप्रसंगेन तद्विशे
32 षणाविवक्षायोगादिति भावः। सर्वदेति काष्ठादिष्वग्निसंयुक्तेष्वप्यवयवनाशस्यैव दाहविधिमा
नत्वान्न निमित्तत्वमित्यर्थः न त्वकरीषाग्नेः संबंधस्य नाशस्य निमित्तत्वाभावेप्यग्निव्याप्तस्य त
स्य निमित्तत्वमस्त्वत आह न चेति अग्नेर्व्याप्तिरिति विनाशेनाग्निव्याप्तिर्नामकान्तर्गतेन संबंधः स
च कादाचित्क इत्यर्थः नेनाग्निरिति श्रौतस्योद्धानस्य निमित्तत्वासंभवाद्द्वाकागम्यमेवाग्नेर्निमि
त्तत्वं स्वीकार्यमित्यर्थः अग्नेर्निमित्तत्वेन स्याग्निहोत्रांगत्वेन संस्कार्यत्वयोग्यत्वात्सामवायिक
त्वं भवेत्तदेवमुक्तं नारादुपकारकत्वमित्याशयेनाह तस्येति तन्त्रेव भस्मादिदृष्टसाधारणोपनोद्धानपरीता श्रीरामः
ग्नित्वेनैव निमित्तत्वं न त्वग्निहोत्रार्थत्वमपि विशेषणं वाक्यभेदप्रसंगात्तत्राह अग्निहोत्रेति सामवा ३२
यिकत्वानुरोधेनाग्निहोत्रार्थाग्न्युत्सादनसामर्थ्यस्यैव निमित्तत्वाद्विधेयसामर्थ्यानुसारेण

ग्निहोत्रार्थत्वविशेषणेन दोषः । एतस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्राय
श्चित्तमिति एतत्राग्न्युभयत्वविहितिभावः । एतेत्र प्रसंगादग्निहोत्रोपकारकेऽहाशिंके प्रायश्चित्तं न विद्यते
परार्थत्वादग्निहोत्रार्थ एव प्रायश्चित्तं यस्माद्विधीयते ॥ धार ॥ गतश्रियः आमश्रियः एतत्र तादर्थ्या
भावाद्दृष्टार्थत्वाग्न्युद्धाने प्रायश्चित्ताभावेपीह तादर्थ्यसत्त्वात्प्रायश्चित्तमिति संगतिः अन्यार्थमिति
सत्यमग्निहोत्रार्थत्वमग्नेस्तथापि न तन्मात्ररूपस्योद्धानं निमित्तं किंतु यस्याग्निरुद्धृत इति श्रुतेस्त
दर्थोद्धृतस्योद्धानं न च गतश्रीस्थले उद्धरणमग्निहोत्रार्थं येनोद्धृतोग्निरपि तदर्थः स्यात् । अन्या
र्थमेवोद्धृतोग्निर्गतश्रीत्वेन धार्यत इति गतश्रीत्वस्य धारण एव निमित्तत्वं नोद्धरणे इत्युद्धृतस्यो
ग्नेर्नैतादर्थ्यमित्यर्थः ननूद्धरणं विना धारणस्यासंभवाद्धार्थं उद्धरणस्यापि गतश्रीत्वं निमित्त
मेव गतश्रीरुद्धृत्याहवनीयं धारयेदिति तच्चोद्धरणपूर्वकं धारणं फलकल्पनाभीप्सा गतश्रिया
पुरुषेणायानि कर्माणि क्रियन्ते तदर्थमित्युद्धरणस्याप्यग्निहोत्रार्थत्वमिति शंकां निराकरोति अ
न्यार्थमित्युक्तं धारणमन्यार्थमुद्धृतेपि संभवतीति न तद्बलादुद्धरणस्यापि सर्वकर्मार्थत्वं

शा॰टी॰९ येनोद्धरणमग्निहोत्रार्थं स्यादित्यर्थः इदं च धारणस्य सर्वकर्मार्थत्वमभ्युपेत्योक्तं वस्तुतस्तु न सकृग
३३ न्तश्चिय इति षष्ठीश्रुत्या पुरुषार्थत्वमेव तन्न दूलाच्च फलकल्पनान दोष इति ध्येयं तु प्रकरोतीति नोप
कारकत्वमात्रेनादृष्टमित्युक्तं तृतीय इति भावः सत्रे धारणाविषयेपि न प्रायश्चित्तमुद्धरणस्यप्र
33 णर्थत्वात्॥ नन्न॥ अन्यार्थोद्धृताग्निनाशे प्रायश्चित्ताभावेप्यन्यार्थोद्धरणे मंत्रस्यादिति संगतिः
नागमितिनांगत्वमित्यर्थः यागार्थयोरिति श्रस्युद्देयष्टांश्रुते चनंदधंस्वरूमितिश्रुतयोरिति शेषः
नन्वग्निहोत्रार्थोद्धरणे मंत्रस्य सायमधिवृक्तः सर्यः कालः प्रातश्चादिःसर्यस्तस्य च प्रातरग्नि
होत्रानंतरं क्रियमाणो दर्शार्थोद्धरणेऽसंभवात्कथं मंत्रप्रसक्तिः कालस्यांगत्वप्रधानार्थेन
योद्धरण इव मंत्रेप्यंगत्वादिति तत्राह कालमिति मंत्रस्येति प्रधानमिशेषः।उद्धरणस्यानंगत्वेप्यु
पकारकतामात्रेण मंत्रप्राप्तिमुक्त्वा इदानीमंगमेवोद्धरणमित्याह अथवेति काल इति कालस्यां श्रीएमः
गत्वेपि नांगांतरवद्विधिबलादुपादेयत्वमिति काले प्राप्ते सांगकर्मकर्तव्यमतो काले क्रियमाण ३३
मुद्धरणं मंत्रो वानधिकारादंगमेवेत्युद्धरणांगत्वमादाय द्वितीयो मंत्रांगत्वमादाय प्रथमश्चप्र

वैपक्षेनवकाशइत्यर्थः दर्शार्थोद्धरणादेवप्रसंगादग्निहोत्रसिद्धेः प्रणयनलोपोपिनदोषइति
ध्येयंसत्त्रेपरार्थमुसन्नेयस्याग्निहोत्रस्यचोदनातत्रमंत्रोनस्यात्प्रागकालत्वात्॥ अ२॥ आदि
त्यइतिअदितिर्देवताकइत्यर्थः किंपयः प्रदेयधर्मान्नूलभतेउतप्रणीतार्थधर्मान्नूतदर्थं किंप्रदे
यत्वेनविधीयतेउतप्रणीताकार्येविधीयतइतिसंशयमिकर्षः दर्शार्थोद्धरणस्याग्निहोत्रार्थत्वा
भावेनतदुद्धरणधर्मप्राप्त्यभावेपिपयसः प्रदानार्थेनयाप्रदेयधर्मप्राप्तिरितिसंगतिः संहितेच
रुपयसोरेकस्मिन्याकेदेवताविधानमहिम्नासाहित्यावगमात्सहरुश्रपणंलभ्यतइत्यभिमानः
अभ्युदयेति। तत्रयथासहश्रपयतीतिवाक्यबलात्सहश्रपणोआर्थिकमाधारत्वंसमभ्यानद्घने
नथेत्यर्थः पयसेतिनस्यविशेषणत्वंचरुद्वाराचरोश्चतद्धितार्थद्रव्यसामान्यद्वाराबोध्यंनसम
मीतिविस्पष्टंवैशिपिविष्टायेत्यादिवद्धिंनेवविधिव्यापारंसमभिव्याहारबलादेवपयसश्चरुविशे
षणत्वावगमेपयोविशिष्टचरुविशिष्टदेवतासंबंधविधिसंभवात्पयश्चरुसंबंधार्थंविध्याहत्रि
भीत्यानसमभ्यर्थस्याविवक्षायुक्तेत्यर्थः सत्त्रेसहश्रपणोप्रदानमपिसहरुद्दश्यतेचरोः पयसास

हूयमानत्वानुभवाद्दधिमधुघृतमापोधाना इत्यादिवाक्ये स्पष्टत्वाच्च पयसोपि यागार्थद्रव्यत्वा
त्प्रदेयधर्मोस्तु॥ अभ्यु॥ निमित्त इति अभ्युदयलक्षणइत्यर्थः प्रणीतार्थविधिरिति प्रणीताका
र्ये अपणो विधिरित्यर्थः सूत्रे अभ्युदये दोहापनयः अपनीतदेवताको दोहः प्रदेयधर्मः स्यान्न प्रदेयत्वे
न दोहप्रवृत्तेः॥ अप॥ पूर्वोपवादात्संगतिः सूत्रे प्रदेयत्वापनयो वा चरूपयोवत्प्रणीताकार्ये विधा
नात्॥ अप॥ पशुकामस्थले पयसि प्रदेयधर्माभावेपि श्रयणोस्तु तद्धर्मप्राप्तिरित्याक्षिप्तेः संग
तिः हिरण्येनस्वकं धानाभिर्हीयोजनमित्यादिरादिशब्दार्थः सूत्रे श्रयणानां पयः प्रभृतीनां प्र
धानार्थे विधाने स्यात्। न चोत्र प्रकृतितः प्राप्तश्रयणमनूद्य पयः प्रभृतेर्द्रव्यस्य विधानमित्यु
पयन्निरस्ति सोमयागपूर्वत्वात्॥ पर्य॥ पशुः प्रभृतीनामिव परस्वत्वामपि न हविष्टुं यागाविधेरभा
वादित्युत्थितेः संगतिः परस्वंतः आरण्यमृगविशेषाः पर्यग्निकरणविशिष्टस्यैवोपदेशद्व्यो श्रीराम॰
त्सर्गस्य यागरूपत्वाभावेन चोदकतः प्राप्त्यभावात् पर्यग्निकरणमपि विधेयमित्याशयः आनं ३४
तर्यमिति अव्यवहितोत्तरत्वमित्यर्थः ननु पर्यग्निकरणस्य चोदकप्राप्तत्वेपि न तद्विधेरान

र्थसंस्कारोपकारकत्वात्तांगविशेषाश्चोदकपरिलोपकत्वेन गृहमेधीये आज्यभागप्रवणवद्
पूर्वोक्तार्थत्वादित्याशंकानिषेधनेनचेति सिद्धवद्विधिनिषेधयोपसर्जनप्रतीतेरितिभावः नचेति
पर्यग्निकृतानितिकृतपर्यग्निकरणानिर्देशात्पर्यग्निकरणान्तानियान्यंगानितेषुकृतेष्वेवकृ
तपर्यग्निकरणस्यमितिपर्यग्निकृतशब्दः शक्नोतितदंतांगरीतिमुपस्थापयितुमितिभावः अ
पूर्वताविधिपरत्वेनपर्यग्निकरणविधानेनयेनतस्यसिद्धवदुपसर्जनीभूततयानिर्देशेनाविध्य
नर्हतास्यात्किंतुपर्यग्निकरणांतांगरीतिविधानेनतस्याश्चोदकतः प्राप्तत्वेपिगृहमेधी
यन्यायेनचोदकलोपेसतिचोदकतोंगानराणामप्राप्त्याफलतोंगांतरप्रतिषेधार्थत्वादित्या
शयेनाहकृतेतिसूत्रेपर्यग्निकरणवाक्येनपर्यग्निकृतानामुत्सर्गेईशानवाक्याविहितस्याल
भस्यताद्दर्थ्यंयथाचरुमुपदधातीतिविहितोपधानार्थचरूपधानेनहून्नतुयागविधिः॥ आ
ज्य॥ पूर्वाधिकरणेआज्येनशेषंसंस्थापयतीतिलिंगदर्शनत्वेनप्रसक्तंतत्रचयागांतर
विधित्वएवतस्यलिंगत्वमुपपद्यतइतितस्ययागांतरविधित्वसमर्थनात्संगतिरित्याहः कि

शा॰दी॰९ मिति पर्यग्निकृतमुत्सृजतीति पर्यग्निकरणानंतरं तत्संभीपशित्यागो विधीयते परि न्यक्के च न द्यागस्य
३५ द्रव्यापेक्षायाः पशुस्थाने आज्यं प्रति निषिद्धत्वेन विधीयते अतोन्यद्रव्यकयागांतरविधिरित्यर्थः
श्लोके संस्कृतो चेत्सन्नयः सत्वे आज्येन शेषं संस्थापयतीत्यत्राज्यं प्रतिनिधिः स्यात्तत्पशुद्र
35 व्यस्योत्सृष्टत्वेन कर्मणो द्रव्यापेक्षत्वात् ॥ ॥इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाप्रकाशे
नवमाध्याये चतुर्थः पादः ॥४॥ इति समाप्तश्चाध्यायः ॥९॥ छ ॥ छ

श्रीरामः
३५